नं० ७८१ - च

मेघदूतव्याख्या संजीवनीसमाख्या

नं० ७८१ - च

पत्राणि ३५

३५

ॐ श्रीगणेशाय नमः ।। मातापितृभ्यां जगतो नमो वामार्द्धजानये सद्यो दक्षिणदृक्पातसंकुचद्वामदृष्टये १ अंतरायतिमिरोपशांतये
शांतपावनमचिंत्यवैभवं तं नरं वपुषि कुंजरं मुखे मन्महे किमपि तुंदिलं महः २ शरणं करवाणि शर्मदं ते चरणं वाणि चराचरो
पजीव्यं करुणामसृणैः कटाक्षपातैः कुरु मामंब कृतार्थसार्थवाहं ३ इहान्वयमुखेनैव सर्वं व्याख्यायते मया नामूलं लिख्यते किं
ते चिन्नानपेक्षितमुच्यते ४ आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति शास्त्रात्काव्यादौ वस्तुनिर्देशेन कथां प्रस्तौति क
श्चिदिति स्वाधिकारात्स्वनियोगात्प्रमत्तोऽनवहितः प्रमादोऽनवधानतेत्यमरः जुगुप्साविरामप्रमादार्थानामुपसंख्यानमित्यपा
दानत्वात्पंचमी अतएवापराधाद्धेतोः कांताविरहेण गुरुणा दुर्भरेण दुरुत्तरेणेति यावत् गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि
दुर्भर इति शब्दार्णवे वर्षं संवत्सरं भोग्येण कालाध्वनोरत्यंतसंयोगे इति द्वितीया अत्यंतसंयोगे चेति समासः कुमति चेति णत्वं भ
र्तुः स्वामिनः शापेन अस्तं नाशं गमितो महिमा सामर्थ्यं यस्य सोऽस्तंगमितमहिमा अस्तमिति मांतमव्ययं तस्य द्वितीये योगविभागा
त्समासः कश्चिद्यक्षो देवयोनिविशेषः विद्याधराऽप्सरोयक्षरक्षोगंधर्वकिंनराः पिशाचो गुह्यकः सिद्धो भूतोमी देवयोनयः
इत्यमरः जनकतनयायाः सीतायाः स्नानैरवगाहनैः पुण्यानि पवित्राण्युदकानि येषु तेषु पवित्रेष्वित्यर्थः छायाप्रधानास्तरव
श्छायातरवः शाकपार्थिवादित्वात्समासः स्निग्धाः सांद्राश्छाया छायातरवो नमेरुवृक्षा येषु तेषु वसतियोग्येष्वित्यर्थः स्निग्धं तु म
सृणे सांद्रे छायावृक्षो नमेरुः स्यादिति च शब्दार्णवे रामगिरेश्चित्रकूटस्याश्रमेषु वसतिं स्थितिं वहिवसतिभ्यश्चेत्यौणादिकोऽतिप्रत्
ययः चक्रे कृतवान् अत्र काव्ये तत्र तत्र नगरार्णवादिवर्णनसंभवान्महाकाव्यत्वं रसो विप्रलंभः शृंगारः अत्राप्युन्मादावस्था अतएवै
कत्रानवस्थानं सूचितमाश्रमेष्विति बहुवचनेन सीतां प्रति रामस्य हनुमत्संदेशं निधाय मेघसंदेशं कविः कृतवानित्याशयेनाहुः अ
त्र सर्वत्र मंदाक्रांतावृत्तं तल्लक्षणं मंदाक्रांता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेति । १ । तस्मिन्नद्रौ चित्रकूटे अबलाविप्रयुक्तः कांता
विरही कनकवलयः कटकं कटकं वलयोऽस्त्रियामित्यमरः तस्य भ्रंशेन पातेन रिक्तः शून्यः प्रकोष्ठः कूर्परादधः प्रदेशो यस्य सतथोक्तः क

१
मे॰दू॰
टी॰

न्धांतरे प्रकोष्ठः स्यात्प्रकोष्ठः कूर्परांध इति शब्दार्णवे विरहदुःखात्कृशत्वमर्थः कामी कर्मुकः स यक्षः कतिचिन्मासान्ष्टौ मासानित्यर्थः
मासानन्यानागमय्य चतुर इति वक्ष्यमाणवचनात् नीत्वा यापयित्वा आषाढाभिर्नक्षत्रेण युक्ता पौर्णमासी आषाढी नक्षत्रेण युक्तः का
लः इत्यण् टिड्ढाणञ् इत्यादिना ङीप् सास्मिन्नित्याषाढो मासः सास्मिन्पौर्णमासीति संज्ञायामित्यण् तस्य प्रथमदिवसे आश्लिष्टसा
नुमान्तो तकंठकं वप्रक्रीडा उत्खातकेलयः उत्खातकेलिः शृंगाद्यैर्वप्रक्रीडा निगद्यत इति शब्दार्णवे ता सु परिणतस्तिर्य
ग्दन्तप्रहारः तिर्यग्दन्तप्रहारस्तु गजः परिणतो मत इति हलायुधः स चासौ गजश्चेति स इव प्रेक्षणीयो दर्शनीयस्तं मेघं ददर्श गजप्रे
क्षणीयमित्यत्रेवशब्दलोपाल्लुप्तोपमा केचिदाषाढस्य प्रथमदिवसे इत्यत्र प्रत्यासन्ने नभसि इति वक्ष्यमाणनभोमासप्रत्यासत्त्यर्थं प्रत्यासन्नप्र
थमदिवसे इति पाठं कल्पयन्ति तदसंगतं प्रथमातिरेके कारणाभावात् नभोमासस्य प्रत्यासत्त्यर्थमुक्तमिति चेत् न प्रत्यासत्तिमात्रस्यमे
सप्रत्यासत्त्यैव प्रथमदिवसस्याप्युपपत्तेः अत्यंतप्रत्यासत्तेरुपयोगित्वाभावेना विवक्षितत्वात् विवक्षितत्वे वा स्वपक्षेपि प्रथमदिवसाति
क्रमे मेघदर्शनकल्पनायां प्रमाणाभावेन तदसंभवात् प्रत्युत स्वयक्षे एव कुशलसंदेशसंभाव्यनर्थप्रतीकारार्थस्य पुरत एवानुमा
नमुक्तं भवतीत्युपयोगः स्थितः ननून्मत्तस्य नायं विवेक इति चेत् न उन्मत्तस्यानो नर्थ प्रवृत्तिरपीति संदेश एवमाभूत् तत्प्राचकाव्यारंभ
एवासिद्धः स्यादित्यहो मूलच्छेदी पांडित्यप्रकर्षः कथं तर्हि शापांते मे भुजगशयनादुत्थिते शार्ङ्गपाणा वित्यादिना भगवत्प्रबोधावधि
कस्य शापस्य मासचतुष्टयावशिष्टस्योक्तिः दशादिवसाधिक्यो इति चेत् स्वपक्षेपि कथं सा विंशतिदिवसैर्न्यूनत्वादिति संतोष्टव्यत
स्मादीषद्वैषम्यमविवक्षितमिति सुष्ठूक्तं प्रथमदिवस इति ॥२॥ राजानो यक्षाः राजा प्रभौ नृपे चंद्रे यक्षे क्षत्रियशक्रयोरिति विश्वः रा
ज्ञां राजा राजराजः कुबेरः राजराजो धनाधिप इत्यमरः राजाहः सखिभ्यष्टच् इति टच् तस्यानुचरो यक्षः अंतर्बाष्पः धीरोदात्तत्वा
देवस्तंभिताश्रुः सन् कौतुकाधानहेतोरभिलाषोत्पत्तिकारणस्य कौतुकं चाभिलाषे स्यादुत्सवे नर्महर्षयोरिति विश्वः तस्य मेघस्य
पुरोग्रे कथमपि गरीयसा प्रयत्नेनेत्यर्थः ज्ञानहेतु विवक्षायामप्याधिक्यथमव्ययं कथमादितथा प्यंतं यत्नगौरववाचकत्वयोरित्युज्ज्वलः स्थि
त्वा चिरं दध्यौ चिंतयामास ध्यै चिंतायामिति धातोर्लिट् मनोविकारोपशमनपर्यंतमिति शेषः विकारहेतुमाह मेघेति तथाहि

म ५

त्वा

तिकारा
र्थप्र ८

१

मेघालोके मेघदर्शने सति सुखिनोऽपि प्रियादिजनसंगतस्यापि चेतश्चित्तं अन्यथाभूता वृत्तिर्व्यापारो यस्य तदन्यथावृत्ति भवति विकृतिमा
१ प्नोतीत्यर्थः। कण्ठाश्लेषप्रणयिनि कण्ठालिंगनार्थिनि जने दूरसंस्थे दूरे संस्था स्थितिर्यस्य तस्मिन् दूरसंस्थे सति किं पुनः विरहिणामिति किमु
त वक्तव्यमित्यर्थः। विरहिणां मेघसंदर्शनमुद्दीपनमित्यर्थः। अर्थान्तरन्यासोऽलंकारः तदुक्तं दण्डिना ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तु कारः ३
त्य किंचन तत्साधनसमर्थस्य न्यासो योऽन्यवस्तुन इति ३ अथ समाहितात्मा करणैः सन् किं कृतवानित्यत आह स यक्ष
श्चिरं दध्यौ स इत्यर्थः नभसि श्रावणे मासि नभाः श्रावणो नभा इत्यमरः प्रत्यासन्ने अथाषाढस्यानन्तरतया संनिकृ
का ष्ट इत्यर्थः दयिताजीवितालंबनार्थी सन् वर्षाणां स्वविरहिदुःखजनकत्वादुत्पन्नप्रतीकारादुत्पत्तिप्रतिबंध एव वरमिति
न्यायेन प्रागेव प्रियाप्राणधारणोपायं चिकीर्षुरित्यर्थः जीवनेन जलेन समूतः पुटबंधो जीमूत इति स्वामी पृषोदरादित्वात्सा
धुः तेन जीमूतेन जलधरेण प्रयोज्येन स्वकुशलमयीं स्वक्षेमप्रधानां प्रवृत्तिं वार्त्तां वार्त्ता प्रवृत्तिर्वृत्तान्त इत्यमरः हारयिष्यन् प्रा
पयिष्यन् लृट् शेषे चेति चकारात् क्रियार्थक्रियोपपदात् लृट् प्रत्ययः जीवनार्थं कर्म जीवनप्रदानेन कर्त्तव्यमिति भावः हृक्रो
रन्यतरस्यामिति कर्मसंज्ञाविकल्पात् पक्षे कर्त्तरि तृतीया प्रत्यग्रैरभिनवैः कुटजकुसुमैः गिरिमल्लिकाभिः कुटजो गिरिमल्लि
केति हलायुधः कल्पितार्घाय कल्पितोऽर्घः पूजाविधिर्यस्मै मूल्ये पूजाविधावर्घ इत्यमरः तस्मै जीमूताय क्रियाग्रहणमपि
कर्त्तव्यमिति संप्रदानत्वाच्चतुर्थी प्रीतिप्रमुखानि प्रीतिपूर्वकाणि वचनानि यस्मिन्कर्मणि तत् प्रीतिप्रमुखवचनं यथा तथा
मा शोभनं गतं स्वागतं स्वागतप्रवचनं प्रीतः सन् व्याजहार कुशलागमनं पप्रच्छेत्यर्थः। ताभ्येन तत्र प्रत्यासन्ने नभसीति सी
पाठे पूर्वविरोधेन प्रत्यासन्ने मनसीति साधीयान्पाठः प्रत्यासन्ने प्रकृतिमापन्ने सतीत्यर्थ इत्युक्तं तदसत् पूर्वपाठविरोधस्यास्मा
भिराषाढस्य प्रथमदिवस इत्यत्रैतत्समाधानेनैव समाधापितत्वात् ४। ननु चेतनसाम्यं कथमचेतनेन कारयितुं प्रवृत्त इत्यपे
क्षायां कविः समाधत्ते धूमेति धूमश्च ज्योतिश्च सलिलं च मरुच्च पुंश्च तेषां सन्निपातः संघातो मेघः क्व अचेतना
त्वात्संदेशानर्ह इत्यर्थः पटुकरणैः समर्थेन्द्रियैः करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि चेत्यमरः प्राणिभिश्चेतनैः प्राणी

मे॰दू॰टी॰
२

तु चेतनाज्ञ इत्यमरः प्रार्थनीयाः प्रापितव्याः संदिश्यंत इति संदेशास्त एवार्थाः क्क इत्येव मौत्सुक्यादिष्टार्थोद्युक्तत्वात् इष्टा
र्थोद्युक्त उत्सुक इत्यमरः अपरिगणयन् अविचारयन् गुह्यको यक्षः तं मेघं ययाचे याचितवान् ननु याच याच्ञायां न पाहि
कामार्त्ता मदनातुराः चेतनाश्चाचेतनाश्च तेषु विषये प्रकृतिकृपणाः स्वभावदीनाः कामांधा नायुक्तायुक्तविवेकशून्यत्वाद
चेतनयाच्ञा न विरुध्यत इत्यर्थः अत्र मेघसंदेशयोर्विरूपघटनारूपो विषमालंकारः तदुक्तं विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य
वा भवेत् विरूपघटना चासौ विषमालंकृतिस्त्रिधा स चार्थांतरन्यासानुप्राणित इत्यसमर्थकत्वेनैव चतुर्थपादेनार्थांतरन्यासात् ५
संप्रति याच्ञाप्रकारमाह जातमिति हे मेघ त्वां भुवने विदित प्रसिद्धे भुवनविदिते निष्ठेति भूतार्थे क्तः मतिबुद्धीत्यादिना वर्त्तमाना
र्थत्वेपि क्तः स च वर्त्तमान इति भुवनशब्दस्य षष्ठ्यंततानिषेधात् समासो न स्यात् क्तेन च पूजायामिति निषेधात् पुष्करावर्त्तकाश्च
पुष्करावर्त्तका नाम केचिन्मेघानां कूटस्थास्तेषां वंशे जातं महाकुलप्रसूतमित्यर्थः कामरूपमिच्छाधीनविग्रहं दुर्गादिसंचारक्षम
मित्यर्थः मघोन इंद्रस्य प्रकृतिपुरुषं प्रधानपुरुषं जानामि तेन तत्त्वम्भुत्वादि जानामीत्यादि गुणयोगित्वेन हेतुना विधिवशाद्दैवा
यत्तत्वात् विधिर्विधाने दैवे चेत्यमरः वशा आयत्ते वशमिच्छाप्रभेदयोरिति विश्वः दूरे बंधुर्यस्य स दूरबंधुः वियुक्तभार्योहं त्वय्यर्थि
त्वं गतः याचकस्य याच्ञा गुणोत्कर्षः कुत्रोपकल्प्यत इत्याशंकायां दैवाद्याच्ञाभंगेपि लाघवदोषाभाव एवोपयोग इत्याह याच्ञेति त
थाहि अधिगुणे ऽधिकगुणे पुंसि विषये याच्ञा मोघा विफलापि वरमीषत्प्रियं दातुर्गुणाढ्यत्वात् प्रियत्वं याच्ञावैफल्यादीषत्प्रि
यत्वमिति भावः अधमे निर्गुणे याच्ञा लब्धकामापि सफलापि न वरं ईषत्प्रियमपि न भवतीत्यर्थः देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबे
मनाक्प्रिय इत्यमरः अर्थांतरन्यासानुप्राणितः प्रेयोलंकारः तदुक्तं दंडिना प्रेयः प्रियतराख्यानमिति एतदाद्यपादत्रये तुर्यपादस्येना
र्थांतरन्यासेनोपजीवितत्वं व्यक्तमेवैतत् ६ हे पयोद जलद त्वं संतप्तानां आतपेन प्रवासविरहेण च संज्वरितानां संतापः संज्वरः समा
वित्यमरः शरणं आर्त्तपरिखिन्नानां पयोदानेन प्रोषितानां स्वस्थानप्रेरणया च रक्षकोसि शरणं गृहरक्षित्रोरित्यमरः तत्तस्मात्कार
णाद्धनपतेः कुबेरस्य क्रोधेन कोपेन विश्लेषितस्य प्रियया वियोजितस्य मे मम संदेशं वार्त्तां प्रियायां हर प्रियां प्रति [illegible] नयेत्यर्थः सं २

धि१

वंधसामान्ये षष्ठी संदेशं हर लोनायोः संतापं नुदेत्यर्थः कुत्र स्थाने तास्थिता तत्स्थानस्य किं व्यावर्त्तकं तत्राह गंतव्येति वहिर्भवं वाह्यं वहिर्दि
वेपंचजनेभ्यश्चेति वक्तव्यमिति यञ्प्रत्ययः वाह्योद्याने स्थितस्य हरस्य शिरस्थिता चंद्रिका तया धौतानि निर्मलानि हर्म्याणि धनिकभ
वनानि यस्यां सा तद्धौता हर्म्यादि धनिनां वास इत्यमरः अनेन व्यावर्त्तकमुक्तं अलका नाम अलकेति प्रसिद्धा यक्षेश्वराणां वसतिः
स्थानं ते तव गंतव्या त्वया गंतव्येत्यर्थः कृत्यानां कर्त्तरि वा षष्ठी ७ मदर्थे प्रवृत्तस्य ते पथिकांगनाश्वासनमानुषंगिकं फलमित्याह पव
नपदवीमाकाशमारूढं त्वां पथ्यानं गच्छतीति पथिकाः पथः ष्कन्निति ष्कन्प्रत्ययः तेषां वनिता प्रोषितभर्तृकाः प्रत्ययात् प्रियागमनवि
श्वासात् प्रत्ययोधीनशपथज्ञानविश्वासहेतुष्वित्यमरः आश्वसंत्योति विश्वसिताः श्वसिधातोः शत्रंतादुगितश्चेति ङीप् तथाउद्गृ
हीतालकांता हर्षप्रसारार्थमुन्नमय्य धृतालकाग्राः सत्यः प्रेक्षिष्यंते अत्युत्कर्षतया द्रक्ष्यंतीत्यर्थः तथाहि त्वयि सन्नद्धे व्यावृ
ते सति विरहेण विधुरां विवशां जायां क उपेक्षेत न कोपीत्यर्थः अन्योपि मद्व्यतिरिक्तोपि यो जनोऽहमिव पराधीनवृत्तिः पराय
त्तजीविको न स्यात् स्वतंत्रस्तु कोपि नोपेक्षेतेति भावः इत्यर्थांतरन्यासः ८ निमित्तान्यपि ते शुभानि दृश्यंत इत्याह अनुकूलः पव
नो वायुश्च मंदं मंदं अतिमंदमित्यर्थः अत्र कथंचिद्वीप्सायामेव द्विरुक्तिर्निर्वाहनीया प्रकारे गुणवचनस्येत्येतदाश्रयणे तु कर्मधा
रयवद्भावेन सुप्लुकि मंदमंदमिति स्यात् तदेवाह वामनः मंदंमंदमित्यत्र प्रकारार्थे द्विर्भावः इति यथासदृशं भाविफलानुभवमित्यर्थः यथासा
दृश्ययोग्यत्ववीप्सा स्वार्थानतिक्रम इति यादवः नुदति प्रेरयेति अयं स गंधः सगर्वः संबंधुरिति केचित् गंधो गंधक आमोदे लेशे संबंधि
गर्वयोरित्युभयत्रापि विश्वः ते तव वामो वामभागस्थः वामस्तु वक्रे रम्ये स्यात् सव्ये वामांगकेपि चेति शाश्वतः चातकः पक्षिविशेषश्च म
धुरं श्राव्यं नदति व्याहरति इदं निमित्तद्वयं वर्त्तते वर्त्तिष्यते चापरं निमित्तमित्याह गर्भेति गर्भः कुक्षिस्थो जंतुः गर्भोपवरके
सग्रो सुते पनसकंटके कुक्षौ कुक्षिस्थजंतुश्चेति यादवः तस्याधानमुत्पादनं तदेव क्षणमुत्सवः सुखहेतुत्वादिति भावः निर्व्यापार
स्थितौ कालविशेषोत्सवयोः क्षण इत्यमरः तस्मिन्परिचयात् अभ्यासाद्धेतोः खे व्योम्नि आवद्धमाला गर्भाधानसुखार्थं त्वत्समीपे वद्धपं
क्तय इत्यर्थः उक्तं च कर्णोदये गर्भं वलाका दधते भ्रयोगान्नाके निवद्धावलयः समंतादिति वलाकावलाकांगनाः नयनसुभगं

मे०टी०
३

दृष्टिविषयंभवंतंनूनंसत्यंसेविष्यंते अनुकूलेमारूतेचातकशाचित्तवलाकादर्शनानांशुभसूचकत्वंशाकुनशास्त्रे दृष्टं तद्विस्तरभयान्नाले
खिटे नचतस्यानाशाद्भूतस्ववल्लनाद्वानिरर्थकस्त्वत्प्रयासइत्याह हेमेघदिवसानामवधिभूतदिनानांगणनायांव्याने तत्परामासक्तांत
त्परे प्रसितासक्तावित्यमरः अतएवाव्यापन्नाममृतां आशापावसाने मदागमनप्रत्याशयाजीवंतीमित्यर्थः एकःपतिर्यस्याः सातामेकपत्नीं
पतिव्रतामित्यर्थः नित्यंपत्न्यादिष्विति ङीप् नकारश्च भ्रातुर्मे जायां मातृवन्निःशंकंदर्शनीयां अविहतगतिः सफलगतिः सन्नवश्यंद्रक्ष्य
स्यालोकयिष्यसे तथाहि आशाऽतितृष्णा आशादिगतितृष्णयोरितियादवः वध्यतेऽनेनेतिवंधो वंधनंवृंतमितियावत् आशेव
वंधः आशावंधः कर्त्री प्रणयिप्रेमयुक्तं अतएवकुसुमसदृशं सुकुमारमित्यमरः अतएवविप्रयोगेविरहे सद्यःपाति सद्योभ्रंसनशी
लं अंगनानांहृदयंजीवितंहृदयंजीवितेवक्षस्याकूतकेपिचेतिशाश्वतः प्रायशः प्रायेण रुणद्धि प्रतिवध्नाति हि इत्यर्थांतरन्यासः १०
यद्गर्जितंकर्तृ महीमुच्छिलींध्रामुद्भूतकंदलीकां कंदल्यांचशिलींध्रस्यादितिशाश्वतः अतएवावंध्याकर्तुंप्रभवतिशक्नोतिशिलींध्राः णं
भाविसस्यसंपत्तिसूचकत्वादितिभावः तदुक्तं निमित्तनिदाने कालाभ्रयोगादुदिताःशिलींध्राः संपन्नसस्यां कथयंति भूमिमिति तच्छ्रु
वणसुभगं श्रोत्रसुखं लोकस्येतिशेषः तेतवगर्जितंश्रुत्वा मानसोत्काः मानसेसरसिउन्मनसः उत्सुकाइतियावत् उत्कउन्मनाइतिनिपा
न तनात्साधुः कालांतरे मांसस्यहिमदुष्टत्वात् हिमस्यच हंसानांरोगहेतुत्वादन्यत्रगताहंसाः पुनर्वर्षासुमानसमेवगच्छंतीतिप्रसिद्धिः।
विसकिसलयानांमृणालाग्राणांछेदैः शकलैः पाथेयं पथिभोज्यं पथ्यतिथिवसतिस्वपतेर्ढञ् तद्वंतः मृणालशकलशंवलवंतइत्य
र्थः राजहंसास्तु तेचंचुचरणैर्लोहितैः सिताइत्यमरः नभसिव्योम्निभवतस्तव आकैलासात् कैलासपर्यंतं एतदद्वयं चेतत् सहायाः
ते सहयात्राः सहायः सहयावः स्यादितिशाश्वतः संपत्स्यं संभविष्यंति ११ प्रियंसखायं प्रियसखं राजाहःसखिभ्यष्टजितिटच् समा
सांतः तुंगमुन्नतं पुंसांवंद्यैः आराध्यैः रघुपतिपदैः रामपादैः मेखलासु कटकेषु अथमेखलाश्रोणिस्थानेद्रिकटके कटिवंधेसिवंध
नः इतियादवः अंकितं चिह्नितं इत्यस्यसखित्वान्महत्त्वात्तवविचित्रत्वाच्च संभवानार्हमतुंशैलं चित्रकूटाद्रिमालिंग्याप्टच्छस्व साधुया
मीत्यामंत्रणे नसभाजयस्व आमंत्रणसभाजने आप्टच्छनमित्यमरः आङिनुप्टच्छोरित्यात्मनेपदं सखित्वं निर्वहेति कालेका
लेप्रतिप्राट्कालेसुहृत्समागमनकालश्शब्देनोच्यते वीप्सायांद्विरुक्तिः भवतस्तेसंयोगेसंतर्कएत्य चिरविरहजं उष्मवाष्पमुष्मा ३
बे।

णं नेत्रजलं च वाष्पो नेत्रजलोष्मणोरिति विश्वः मुंचतो यस्य शैलस्य स्नेहव्यक्तिः प्रेमाविर्भावो भवति स्निग्धानां हि चिरसंगतानां
वाष्पपातो भवतीति भावः १२ तस्य संप्रति मार्गं कथयति हे जलद तावदिदानीं कथयतो मत्त इति शेषः त्वत्प्रयाणस्यानुरूपं मार्गमन
धानं मार्गं मत्पदे मात्रे सौम्ये द्वे त्वेषणे ध्वनीति यादवः तदनु मार्गश्रवणानंतरं श्रोत्राभ्यां पेयं पानार्हं मत्तः त्वत्संदेशं श्रोतव्यमि
त्यर्थः वेधग्रहणात्संदेशस्याश्रव्यत्वं गम्यते मे मम संदेशं वाचिकं संदेशवाग्वाचिकं स्यादित्यमरः श्रोष्यसि यत्र मार्गे खिन्नः खि
न्नोऽभीक्ष्णं क्षीणः क्षीणबलः सन् नित्यवीप्सयोरिति नित्यार्थे द्विर्भावः शिखरिषु पदं न्यस्य निधाय पुनर्बललाभार्थं क्वचिद्विश्रम्येत्यर्थः क्षी
णः क्षीणः अभीक्ष्णं क्षीणांगः सन् अत्रापि हेतुत्वात्पूर्वेहि सक्तिः स्रोतसां परिलघुगुरुत्वदोषरहितं उपलस्फालनेन खेदितत्वा
त्पथ्यमित्यर्थः यदाह वाग्भटः उपलास्फालनोत्क्षेपविच्छेदैः खेदितोदकाः हिमवन्मलयोद्भूताः पथ्यानद्यो भवंत्यमूरिति पयः पार
नीयमुपभुज्य शरीरपोषणार्थमभ्यवहृत्य गंतासि गमिष्यसि गमेर्लुट् १३ पवनो वायुः अद्रेश्चित्रकूटस्य शृंगं हरति किंस्वित्
किंस्वित्छंदोवितर्कार्थे चादिषु पठितः इति शंकयोन्मुखीभिः उन्नमितमुखाभिः स्वांगाच्चोपसर्जनादसंयोगोपधादिति ङीष् मुग्धाभि
र्मूढाभिः सिद्धानां देवयोनिविशेषाणां अंगनाभिः मुग्धः सुंदरमूढयोरित्यमरः चकितचकितं चकितप्रकारं यथा तथा प्रकारे गु
णवचनस्येति द्विर्भावः दृष्टोत्साहो दृष्टसंरंभः सन् सरसा आर्द्रा निचुलाः स्थलवेतसा यस्मिंस्तस्मात् वानीरे कविभेदे स्यान्निचु
लः स्थलवेतसः इति शब्दार्णवे अस्मात्स्थानादाश्रमात् पथि नभोमार्गे दिङ्नागानां स्थूलाये हस्तास्तेषामवलेपानादूपान्परिहरन्
हस्तो नक्षत्रभेदे स्यात्करेभकरयोरिति विश्वः उदङ्मुखः सन् अलकाया उदीच्यत्वादिति आशयः खमाकाशं प्रभुस्तुत्यतो [illegible] अत्रेदा
मर्थांतरं ध्वनयति सरसो रसिकस्तु निचुलो नाम कविः कालिदासस्य सखा व्याख्यातापरापादितानां कालिदासप्रबंधदूषणा
नां परिहर्ता यस्मिन्स्थाने तस्मात् उदङ्मुखः निर्दोषत्वादुन्नतमुखः सन् पथि दिङ्नाचार्यस्य कालिदासप्रतिपक्षस्य हस्तावलेपा
न् हस्तविन्यासपूर्वकाणि दूषणानि परिहरन् अवलेपस्तु गर्वे स्याल्लेपने दूषणेऽपि चेति विश्वः अद्रेः अद्रिकल्पस्य दिङ्नागाचा
र्यस्य शृंगं प्राधान्यं शृंगं प्राधान्यसान्वोरित्यमरः हरतीति हेतुना सिद्धैः सारस्वतसिद्धैर्महाकविभिः अंगनाभिः स्त्रीभिश्च
दृष्टोत्साहः सन् खमुत्पत उच्चैर्भवेति स्वप्रबंधमात्मानं प्रतिमाकवेरुक्तिरिति संसर्गिणो दोषगुणा भवंतीत्येतन्मयायेनज

मे·टी·
४

त्ताशयोऽपि स्थित्वानुकूलं निचुलस्थलं तमात्मानमारक्षतीति सिंधुवेगादित्येतत् श्लोकनिर्माणात्स्वकवेर्निचुलसंज्ञेत्याहुः १४
रत्नछायानां पद्मरागादिमणिप्रभाणां व्यतिकरो मिश्रणमिव प्रेक्ष्यं दर्शनीयं आखंडलस्येंद्रस्य धनुःखंडमेतत् एतदिति हि निर्देशो स्त२
विवक्षितः पुरस्तादग्रे वल्मीकाग्राद्वामलूरविवरात् वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकमित्यमरः प्रभवत्याविर्भवति येन ध
नुःखंडेन ते तव श्यामं वपुः स्फुरितरुचिना उज्ज्वलकांतिना बर्हेणापिच्छेन बर्हं पिच्छे नपुंसके इत्यमरः गोपवेषस्य विष्णोः कृष्णस्येव त्व
५ षीः श्यामं वपुरिवातितरां कांतिं शोभामापत्स्यते प्राप्स्यति १५ त्वय्यायत्तमिति कृषेर्हलकर्मणः फलं सस्यं त्वयि अधिकरणे त्वयि चा
यत्तमधीनं अधीनो निघ्न आयत्त इत्यमरः इति हेतोः प्रीत्या स्निग्धैः अकृत्रिमप्रेमार्द्रैरित्यर्थः भ्रूविकाराणां भ्रूविला
सानामनभिज्ञैः ग्राम्यत्वादिति शेषः जनपदवधूनां पल्लीयोषितां लोचनैः पीयमानः सन् अतितृष्णया निरीक्ष्यमाणः सन् मालमा
लाख्यं क्षेत्रं शैलप्रायमुन्नतस्थलं मालमुंडितभूतलमित्युज्ज्वलः सद्यस्तत्कालमेव सीरैर्लांगलैर्हृतकर्षणेन सुरभि घ्राणतर्पणं प्र
प्यात यागहृत्यतत्रात्किंचित्पश्चेत्यर्थः सुरभिघ्राणतर्पणमित्यमरः किंचित्पश्चाद्व्रज गच्छ लघुगतिस्तत्र निर्वृष्टत्वात् द्रिप्रगमः
सन् लघुद्रिपुमरंदु तमित्यमरः भूयः पुनरपि उत्तरेणैवोत्तरमार्गेणैव वर्जेत्यनुषंगः तृतीयाविधाने प्रकृत्यादिभ्य उपसं
ख्यानमिति तृतीया कश्चिद्दृढवल्लभापतिः कुत्रचित् क्षेत्रे कलत्रे गूढविहृत्य क्षेत्रे शरीरे केदारे सिद्धस्थानकलत्रयोरिति
विश्वः दाक्षिण्यभंगभयान्नीवेमार्गेण निर्गत्य पुनः सर्वाध्यक्षस्य संचरति तद्वदिति ध्वनिः १६ आम्राश्चूताः कूटे सुषिरे सुयस्या
म्रकूटो नाम सानुमान्पर्वतः आम्रकूटोऽरसालः कूटोऽस्त्री शिखरं शृंगमिति चामरः आसारो धारावृष्टिः धारावृष्टिः धारासंपात आ
सार इत्यमरः तेन प्रशमितो वनोपप्लवो दवाग्निर्येन तं कृतोपकारमित्यर्थः अध्वश्रमेण परिगतं व्याप्तं त्वां साधु सम्यक् मूर्ध्ना वक्ष्यतीत्यो
ढावहेद्वचः तथाहि क्षुद्रः कृपणोऽपि क्षुद्रो दरिद्रे कृपणेन्यृशंसके इति यादवः संश्रयाय संश्रयणाय मित्रे सखौ अथ मित्रं सखा सुहृदि
त्यमरः प्राप्ते आगते सति प्रथमसुकृतापेक्षया पूर्वोपकारपर्यालोचनया विमुखो न भवति यस्तथा तेन प्रकारेणोच्चैरुन्नतः सच्चा
मित्त निदाने प्रथमावसथे यस्य सौख्यं तस्याखिले धनि शुभं भवति यात्रायामन्यथा त्वशुभं ध्रुवमिति १७ हे मेघ परिण ४

तैः परिणतैः परिपक्वैः फलैर्द्योतितं तत इति तैर्योक्तैः आबाढे वनचूताः फलंति पच्यंते मेघवातेनेत्याशयः काननाम्रैर्वनचूतैः
छन्नोपांतः आवृतपार्श्वः चिलः आम्रकूटाद्रिः स्निग्धवेणीसवर्णे मसृणकेशवंधछायेश्यामवर्णे इत्यर्थः वेणी च तु केशवं
धे जलस्तु ताविनियादवः त्वयि शिखरं शृंगमारूढे सति यस्य च भावेन भावलक्षणमिति सप्तमी मध्ये श्यामः शेषे मध्या
दन्यत्र विस्तारे परितः पाण्डुः हरिणः हरिणः पांडुरः पाडुरित्यमरः भुवः स्तन इवामरमिथुनानां खेचराणामिति भावः प्रेक्षणी
यां दर्शनीयामवस्थां नूनं यास्यति मिथुनग्रहणं कामिनामेव स्तनत्वेनोत्प्रेक्षासंभवतीति कृतं यथा पथिकः श्रांतः कश्चित्का
क मी कामिनीकुचकलशे विश्रांतः स्वपिति तद्वद्भवानपि भुवो नायिकास्तन इति ध्वनिः १८ हे मेघ वने चरंतीति वनचराः
तत्पुरुषे कृति बहुलमिति बहुलग्रहणाद्भवति ते यां वधूभिर्भुक्ताः कुलता गृहा यस्मिंस्तस्मिन् निकुंजः कुंजो वा क्लीवे लतादि
पिहितोदर इत्यमरः तच्चयेन तेन विनोदोस्तीत्यर्थः तस्मिन्नाम्रकूटे मुहूर्तमल्पकालं न तु चिरकालं न तु चिरकालं स्वकार्यविरो
धादिभावः मुहूर्तमल्पकाले स्यात् घटिकाद्वितयेपि चेति शाश्वतः स्थित्वा विश्रम्य तोयोत्सर्गेण त्वामासारे लघुत्वं वर्षणेन द्रुततरगतिः ला सो
दा घवाद्धेतोः क्षिप्रगमनः सन् तस्मादाम्रकूटात्परमनंतरं वर्त्म मार्गं तीर्णः इति क्तांतः उपलैः पाषाणैर्विषमे विंध्यस्य पादे पादे प्रत्यंतपर्वते पा
दाः प्रत्यंतपर्वता इत्यमरः विशीर्णां समंततो विसृमरां एतेन कस्याश्चिदतिकामुक्याः प्रियचरणपातेपि ध्वन्यते रेवां नर्मदां रेवा तु नर्म वा
दा सोमोद्भवा मेकलकन्यके त्यमरः गजस्यांगे शरीरे भक्तयो [illegible] रचना रेखा इति यावत् भक्तिर्निषेवणे भागे रचनायामिति शाश्वतः ता
सां छेदैः भंगिभिर्विरचितां भूतिं शृंगारमसितमिव च भूतिर्मातंगशृंगारे जातौ भस्मनि संपदीति विश्वः द्रक्ष्यसि अयमपि मदा
सो नयनकौतुकलाभ इति भावः १९ हे मेघ वांतवृष्टिः उद्गीर्णवर्षः सन् कृतवमनस्य व्यज्यते वांते त्यक्तं आदितश्चेति च
कारादिट् प्रतिषेधः तिक्तैः सुगंधिभिः तिक्तः सुरभिश्च तिक्तौरसे सुगंधो चेति विश्वः वनगजमदैर्वासितं सुरभितं भावितं च ति४
हिमवद्विंध्यमलया गजानां प्रभवा नगा इति विंध्यस्य गजप्रभवत्वादिति भावः जंबूकुंजैः प्रतिहततरयं प्रतिबद्धवेगं सुखपे
यमित्यर्थः अनेन लघुत्वकषायभावना च दृश्यते तस्याः रेवायास्तोयमादाय गच्छेः व्रज हे मेघ अंतः सारो बलं यस्य तं त्वाम
निलः आकाशवायुः शरीरस्थ गम्यते तुलयितुं न शक्ष्यति शक्तो न भविष्यसि तथाहि रिक्तोंतः सारशून्यः सर्वो लघुगुरु

मे॰ टी॰
५

भवति प्रकंप्यो भवतीत्यर्थः पूर्णिता सारवत्ता गौरवा यावृकं प्यत्वाय भवतीत्यर्थः अयमत्र ध्वनिः आदौव मनश्शोधितस्स पुंसः पश्चात् कृत्स्ने याश्शोषणाय लघुतिक्तकषायपाना लघु वल स्य वा तप्रकापो तस्मादिति यथाह वाग्भटः कषायांशा हिमा स्तुरक्ता स्वविंदुश्लेष्मणो हिताः किमतिक्ताः कषायावा निस्सृग्रीन्ने वला वहाः ततस्तु द्वैः कमात्या तपे यादेः पथ्यभोजिनः वातना दिभिर्न वाधास्यादिंद्रियैरिव योगिन इति २० सारंगा भंगामा तंगा श्च कुरंगा श्च सारंग चातके भृंगे कुरंगे मतंगजविष्व इति रूढैरेकदेशो ज्ञेतैः केस्यारैः किंजल्कैः हरितः पालाशवर्णः पालाशो हरितो हरिदित्यमरः कपिशः श्यावणैः श्यावः स्यात्कपिशो धूम्र धूमलौ कृष्णलोहित इत्यमरः हरितं च तत्कपिशं च हरितकपिशं श्यामवर्णमिति यावत् वर्णो वर्णेनेति समासः नीपं स्थलकदंबकुसुमं अथ स्थलकदंबके नीपः स्कन्धुलकः श्रीमान् प्रावृषेण्यो हरिप्रिय इतिशब्दार्णवे दृष्ट्वा संप्रेक्ष्य विदित्वेति यावत् तथा कच्छेष्वनूपेष्वनु अनुकच्छं अव्ययं विभक्तीत्यादिना विभक्त्यर्थेऽव्ययीभावः जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविध इत्यमरः आविर्भूताः प्रथमाः प्रथमोत्पन्नाः मुकुला यासां ताः कंदलीभूकंदलीः द्रोणपर्णीस्निग्धकंदा कंदली भूकंदल्यपीति शब्दार्णवे जग्ध्वा भक्षयित्वा अदो जग्धिर्ल्यप्ति किति त्यादेर्जग्धिरादेशः अरण्ये बाधिकसुरभिमति घ्राणतर्पणम् दग्धारण्ये क्षितिपाठे दग्धमित्यरण्यविशेषणमर्थवशात् किंतु कंदलीश्चदृष्ट्वेत्यन्वयो द्रष्टव्यः उर्वीभृतो गंधमाघ्राय जललवमुचः उदबिंदुवर्षकस्य मार्गं सूचयिष्यंति यत्र यत्र वृष्टिकार्यं नीपकुसुमादिकं दृश्यते तत्र तत्र त्वया वृष्टिमिति द्रष्टृभिरनुमीयत इत्यर्थः २१ प्रच्छिन्नमपि व्याख्यायते अंभोबिंदुग्रहणे सर्वसहायतितमं वुंन चातकस्येति भूसंस्पृष्टोदकस्पृते थांरोगहेतुत्वादंतरालएव स्वीकारे चतुरान् चातकान् वीक्षमाणाः कौतुकात्पश्यतः श्रेणीयणः श्रेणयोभूताः श्रेणीभूताः बहुपंक्ती अभूततद्भावे च्विः कुगतिप्रादय इति समासः अथवा श्रेण्यः श्रेणयोभूताः श्रेणीभूताः श्रेणीभूताः बहुपंक्ती अभूततद्भावे च्विः कुगतिप्रादय इति समासः श्रेण्यः श्रेणयोभूताः श्रेणीभूताः अत्राप्यच्विविवक्षायां पूर्ववत्समासः च्व्यर्थमात्रविवक्षायां पूर्ववत्समासः च्व्यर्थमात्रविवक्षायां तु श्रेण्यादयः कृतादिभिरिति समासः वलाकाः बिसकंटिकाः परिगणनया एकाद्वेति स्व इति संख्यानेन निर्दिश्यंती ह स्तेन दर्शयंतः

स्वयंग्रहाश्लेषसुखमनुभूयेत्यर्थः त्वां मानयिष्यति स्रो[illegible]त्वन्निघ्नत्वात्सुखस्नानस्येत्यर्थः ॥२२॥ हे सखे हे मेघ मम प्रियाय मत्प्रियार्थं यद्यपि तथा
द्रुतं दिप्रमरं द्विप्रमरं द्रुतमित्यमरः यियासोर्यातुमिच्छोरपि यातेः सनंतादुप्रत्ययः ते तव ककुभैः कुटजकुसुमैः सुरभौ सुगंधिनि ककु
भ कुटजेन शीतशब्दार्णवे पर्वते पर्वते प्रति पर्वतं वीप्सायां द्विरुक्तिः कालक्षेपं कालविलंबं क्षेपो विलंबे निंदायामिति विश्वः उत्प
श्याम्युत्प्रेक्षे विलंबहेतुदर्शनात् सुगमं प्रार्थयति शु[illegible]क्लेति सजलानि सानंदबाष्पजलानि नयनानि येषां तैः शुक्लापांगैर्मयूरैः
मयूरो बर्हिणो बर्ही शुक्लापांगः शिखावल इति यादवः केकाः स्ववाणीः केका वाणी मयूरस्येत्यमरः स्वागतीकृत्य स्वागतवचनीकृत्य प्रत्यु
[illegible]यातः प्रवृत्तः प्रत्युद्गतः इत्यर्थः भवान् कथमपि यथा कथंचिदाशु गंतुं व्यवस्येत् प्रार्थने लिङ् शेषे प्रथमपुरुषः शेषश्चाम[illegible]द
द्यो युष्मदस्मदोरुपपतिकात् स्वागतीकृत्य केकास्वारोप्यमाणस्य स्वागतवचनस्य प्रकृतप्रत्युद्गमनोपयोगात्परिणामालंकारः तदुक्तम
लंकारसर्वस्वे आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इति ॥२३॥ हे मेघ त्वय्यासन्ने सन्निकृष्टे सति दशार्णा नाम जनपदाः स्वविशिष्टैः सू
चिषु मुकुलाग्रेषु भिन्नैर्विकसितैः केतकीमुकुलाग्रेऽपि सूचिः स्यादिति शब्दार्णवे केतकैः केतकीकुसुमैः पाण्डुच्छायाः पांडुरवर्णा उपवनानां
वृतयः कंटकावरणानि येषु ते तथोक्ताः प्राचीरं [illegible] वृतिरित्यमरः [illegible] बलिभुजां काकादिग्राम्यपक्षिणां नीडारंभैः कुलायनिर्मा

मे. टी.

सौः कुलायो नीडमस्त्रियामित्यमरः चित्याया इमानि चैत्यानि रथ्यावृक्षाः चैत्यमायतने बुद्धविंबे चोद्देशपादप इति विश्वः कुलानि संकीर्णानि ग्रा
मेषु चैत्यानि येषु ते तथोक्ताः एवंविधाः संपत्स्यंते संभविष्यंति योषित्युवति स्त्रीक कतिपये त्यादिना कतिपयशब्दस्योत्तरपदत्वेपि नत्तघ्नद्धस्यो
त्तरत्वमस्यस्यशास्त्रस्याप्रियकत्वात् २४ दिक्षु प्रथितं प्रसिद्धं विदिशेति लक्षणं नामधेयं यस्यास्तां लक्षणं नाम्नि चिह्ने चेति विश्वः तेषां दशा
6 र्णानां संबंधिनीं धीयंतेऽस्यामिति धानी करणाधिकरणयोश्चेति ल्युट् टिड्ढाणञिति ङीप् योगलक्षणया षष्ठीसमस्तत इति वक्तव्यात्समासः राज्ञां धानी राजधानी तां
राजधानीं प्रधाननगरीं राज्ञां राजधानीति कप्यते इति शाश्वतः गत्वा प्राप्य सद्यः कामुकत्वस्य विलासितायाः विलासी कामुकः कामी स्त्रीप
रोरलिलंपट इति शाश्वतः वे अविकलं समग्रं फलं प्रयोजनं लब्धा लप्स्यते त्वयेति शेषः कस्मिन् ल्युट् कुतः यद्यस्मात्कारणात्स्वादु मधुरं च
चलोर्मि यो यस्य तत् चंचलोर्मितरंगितं वेत्रवत्या नामनद्याः पयः सभ्रूभंगमभ्रूकुटियुक्तं दशनपीडयेति शेषः मुखमिवाधरमित्यर्थः तीरोपांते
तटप्रांते यस्तनितं गर्जितं तेन सुभगं यथा तथा स्तनितशब्देन मणितमपि ध्वन्यते ऊर्ध्वमुच्चलितकंठनासिकं हुंकृतस्तनितमल्पघोषवदितिम
णितलक्षणात् पास्यसि धास्यसि पिबतेर्लृट् कामिनामधरास्वादः सुरतादतिरिच्यत इति भावः २५ हे मेघ तत्र विदिशासमीपे विश्रामो विश्रमः खेदाप
नयः भावार्थे घञ् प्रत्ययः स एव हेतुस्तस्य विश्रामहेतोः विश्रामकारणात् विश्रामार्थमित्यर्थः षष्ठी हेतुप्रयोग इति षष्ठी विश्रामेत्यत्र नोदा
त्तोपदेशस्य मान्तस्यानाचमेरिति पाणिनीये वृद्धिप्रतिषेधोपि विश्रामो वेति चांद्रव्याकरणे विकल्पेन वृद्धिविधानाद्रूपसिद्धिः प्रौढपुष्पैर्बहु ६

कुसुमैः कदंबैर्नीपविटपैः त्वत्संपर्कात्पुलकाश्रु संजाताः पुलकितमिव संजातपुलकमिव स्थितं तारकादित्वादितच् प्रत्ययः नी
चैरित्याख्या यस्य नीचैराख्यं गिरिमधिवसेः गिरौ वसेत्यर्थः। उपान्वध्याङ्वस इति कर्मत्वं नीचैर्गिरिः पण्यैः क्रेयाः स्त्रियः वेश्याः (
पारस्त्री गणिका वेश्या पण्यस्त्री रूपजीविनीति शब्दार्णवे तासां रतिषु यः परमलो गंधविशेषः विमर्दोत्थे परिमलो गंधे
जनमनोहरे इत्यमरः तमुद्गिरंत्याविर्भावयंतीति तथोक्तानि तैः शिलायां वेश्मभिः कंदरैः नागराणां पौराणां उद्दामान्युत्क
टानि यौवनानि प्रथयति प्रकटयति उत्कटयौवनान् कांश्चिदनुरक्ता वाराङ्गनाविस्रंभविहारकांक्षिणो मात्रादिभयान्निशी
थसमये विविक्तवनप्रदेशमाश्रित्य रमयंतीति न चात्र बहुलमस्तीति प्रसिद्धः अत्रोदात्तालंकारः शब्दस्तु गौणार्थत्वान्न जुगुप्सावहः प्र
त्युत शोभाकर एव तदुक्तं दंडिनापि निष्ठ्यूतोद्गीर्णवांतादि गौणवृत्तिव्यपाश्रयम् अतिसुंदरमन्यत्र ग्राम्यकक्षां विगा
हते रुद्धाविश्रांतः सन् तत्र नीचैर्गिरौ विश्रांताध्वश्रमः सन् अथ विश्रांतोरनंतरं वने रण्ये या नद्यस्तासां तीरेषु यानि स्व
यं रूपाण्यकृत्रिमाणीत्यर्थः। नदनदीति पाठे तु पुमान् स्त्रियेत्येकशेषो दुर्वारः उद्यानानामारामाणां संबंधिनी यूथि
काजालकानि मागधीकुसुममुकुलानि अथ मागधी गणिका यूथिकाम्बष्ठेत्यमरः कोरककलालककलिकाकुड्मलमु।

मे.टी. १ ७

कुल्यानि तुल्यानीति हलायुधः नवजलकणैः सिंचन् आर्द्रीकुर्वन् अत्र सिंचतेरार्द्रीकरणार्थत्वात् द्रवद्रव्यस्य करणत्वं यत्र
करणमप्रसिद्धं तत्र द्रवं स्वकर्मत्वं प्रधारेतः सिक्ताकुमारीषु स्वयोनिष्वंत्यजासु च तथा सुखैर्निर्षिंचितमिवाम्नतं त्वचीत्येवमादि
एव किरतीत्यादिनामपि रजः किरति मारुतः अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषित इत्यादिष्वर्थभेदाश्रयेण रजो लाजादी(
नां कार्यत्वकारणत्वे गमयितव्ये तथा गंडयोः कपोलयोः स्वेदस्यापनयनेन प्रमार्जनेन या रुजा पीडा तां दोदिभ्यादइप्रत्ययः तया क्ला
तानि म्लानानि करोतीत्यलानि येषां तेषां पुष्पाणि लुनंतीति पुष्पलाव्यः कुसुमावचायिकाः स्त्रियः कर्मण्यण टिड्ढाणञित्यादिना ङीप्
तासां मुखानि तेषां छायया अनातपस्य दानात् कांतिदानं चेध्यते छाया त्वनातपे कांतावित्यमरः क्षणकदर्शनात्कामिनीनां
सुखविकाशो भवतीति भावः क्षणपरिचितः क्षणं संस्पृष्टः सन् न तु चिरं व्रज गच्छ २७ उत्तरां प्रागुदीचीं दिशं प्रति प्रस्थितस्य भवतः
पंथा उज्जयिनीमार्गो वक्रोयद्यपि दूरोयद्यपीत्यर्थः विंध्यादुत्तरवाहिन्या निर्विंध्यायाः पश्चिम इति पंथा वक्रत्वं तथा उज्ज। पु
यिन्या विशाला नगरस्य विशालोज्जयिनी समेत्यमरः सौधानामुत्संगेषु उपरिभागेषु प्रणयः परिचयः प्रणयः स्यात्परि
चये याञ्चायां सौहृदेऽपि चेति यादवः तस्य विमुखः पराङ्मुखो मा स्म भूः मा भवेत्यर्थः स्मोत्तरे लङ् चेति चकारादाशीर्ष्येलुङ्
तमाङ्योगइत्याडागमप्रतिषेधः तत्रोज्जयिन्यां विद्युदाम्नां तडिल्लतानां स्फुरितेभ्यः स्फुरणेभ्यश्चकितैः भीतैः लोला ७

पांगप्रं चलकटाक्षैः पौरांगनानां लोचनैर्नरमसेयदि तर्हि वंचितः प्रतारितस्याः जन्मनैःफलंभवेदित्यर्थः २८ सप्रत्युज्ज
यिनीगच्छतस्तस्यमध्येमार्गं निर्विंध्यायाः संबंधमाह पथिउज्जयिनीपथे वीचीक्षोभेण तरंगचलनेन स्वनितामुखर
नारा कांचीर काः विहगाः हंसानां श्रेणिः पंक्तिरेव कांची गुणः पस्यास्तस्याः स्खलितेनोपलस्खलितेन सुभगं यथातथा
संसर्पत्या गच्छंत्याः तयादर्शिता प्रकटितावर्त्तो भसाभ्रमरा वनाभिर्यस्याः सातस्याः स्यादावर्त्तोम्भसाभ्रमइत्यमरः नि(
क्रांताविंध्यान्निर्विंध्यानामनदी निरादयः क्रांताद्यर्थेपंचम्येतिसमासः द्विगुप्राप्तपन्ने त्यादिनापरवल्लिंगताप्रतिषेधः तस्याः
नद्याः संनिपत्यसंगत्यरसोऽंतलमभ्यंतरे यस्यसः अन्यत्ररसेनश्रृंगारेणाभ्यंतरशोभवांतरंगोभव सर्वेषारसमनुभवेत्यर्थः
श्रृंगारादौजले वीर्येसुवर्णेविषरूक्रयोः आस्वादे चरसंप्राहुरितिशाश्वतः नन्वेतत्प्रार्थनमंतरेणकथंतत्ररसानुभवोयुज
तइत्यतआह स्त्रीणामिति स्त्रीणांप्रियेषु विभ्रमोविलासएवाद्यंप्रणयवचनं प्रार्थनावाक्यं हि स्त्रीणामेवस्वभावो यद्विलासैरेव
रागप्रकाशनं नतुकंठतरएवेतिभावः विभ्रमश्चात्रनाभिदर्शनादिरुक्तएवेति २६ निर्विंध्याप्रत्याह त्ववेणी वेणीभूतं वेणाकारमंतं
वेणी १

दू॰ टी॰ ८

प्रतनुस्तोकं च सलिलं यस्याः सा तथोक्ता वेणीभूतेति च केशपाशो धन्यते कहंतीति कहाः इगुपधलक्षणः कः प्रत्ययः तटवोः कहाः रू
ढो येतरवः तेभ्यो भ्रंश्यंतीति तथोक्तैः जीर्णपर्णैः शुष्कपत्रैः पांडुछाया पांडुवर्णा अत एव सुभगविरहावस्थया पूर्वोक्तप्रकारयाकर
शेन व्यतीतस्यैतावंतं कालमतीतस्य गतस्य प्रोषितस्येत्यर्थः तेतव सौभाग्यं सुभगत्वं हे अंग सिध्यंते पूर्ववदस्य तु भयपदव्यद्धिः व्यंज
यंती प्रकाशयंती स खलु सुभगो यमंगनाः कामयंत इति भावः सा पूर्वोक्ता सिधुनदी निर्विधा स्त्रीनद्यानाक्ष्रदे सिंधुदेशभेदे वृधौगङ्ग
इति वेजयंती येन विधिना व्यापारेण कार्श्यं त्यजति स विधिस्त्वयैवोपपाद्यः संपाद्यः कर्तव्य इत्यर्थः स विधिरेकत्र दृष्टिः अन्यत्र स
भोगः तदभावनिबंधनत्वात्कार्श्यस्येति भावः इयं पंचमी मदनावस्था उक्तं च रतिरहस्ये नयनप्रीतिः प्रथमं चित्तासंगस्त
तोऽथ संकल्पः निद्राछेदस्तनुता विषयनिवृत्तिस्त्रपानाशः उन्मादो मूर्छा मृतिरित्येताः स्मरदशा दशैव स्युः इति
तामतीतस्येति पाठे सिंधुर्नाम नद्यंतरमिति व्याख्यातं सिंधुर्नाम नदविशेषः काश्मीरदेशे स्थितः नदी तु कुत्रापि नास्तीत्यु
पेक्षमाचक्षते ३० विदंतीति विदाः इगुपधलक्षणः कः प्रत्ययः कसः स्थानस्य विदाः उकारस्तु सेपृषोदरादित्वात्साधुः उद
यनस्य वत्सराजस्य कथा चासवदत्ताहरणाद्युक्तुतो पाख्यानानां कोविदास्तत्त्वज्ञा ग्रामेषु येवृद्धास्ते येषु तान् अवंती

न्नाम जनपदान् प्राप्य तत्र पूर्वोद्दिष्टां पूर्वोक्तां सौधोत्संगप्रणयविमुखो मास्म भूरुज्जयिन्या इत्युक्तामित्यर्थः श्रीविशालां संपदयु
क्तां शोभासंपत्तिपद्मासु लक्ष्मीः श्रीरिव दृश्यत इति शाश्वतः विशालां पुरीमुज्जयिनीं विशालोज्जयिनी समे इत्यमरः अनुस
र व्रज कथमिव स्थितां सुचरितफले पुण्यफले स्वर्गोपभोगलक्षणे स्वल्पीभूते ऽल्पावशिष्टे सतीत्यर्थः गां भुवं गतानां गोरिला ।
कुंभिनी क्षमेत्यमरः पुनरपि भूलोकभाजामित्यर्थः स्वर्गिणां स्वर्गवतां जनानां शेषैः पुण्यैः सुहृतैः हृतमानीतं स्वर्गीयानुष्ठित
कर्मशेषाणां स्वर्गादानावश्यंभावादिति भावः कांतिरस्यास्तीति कांतिमदुज्ज्वलं सारभूतमित्यर्थः एवं भुक्तादन्यत् एकं मुख्यान्य
केवला इत्यमरः दिवः स्वर्गस्य खंडमिवास्थितमित्युत्प्रेक्षा एतेनातिक्रांतसकलभूलोकनगरसौभाग्यसारत्वमुज्जयिन्या व्यज्यते ३१
यत्र विशालां प्रत्यूषेषु हि मुखेषु प्रत्यूषो हि मुखो व साविति विश्वः पटु प्रस्फुटं मदकलं मदेनाव्यक्तमधुरं ध्वनौ तु मधुरास्फुटे कलः
इत्यमरः सारसानां पक्षिविशेषाणां सारसो मैथुनी कामी गोनर्दः पुष्कराह्वय इति यादवः पक्षे सारसानां हंसानां च क्रौंचः सारसो ह
स इति शब्दार्णवे कूजितं रुतं दीर्घीकुर्वन् संभावयन् इत्यर्थः यावद्यातं शब्दानुवृत्तेरिति भावः एतेन प्रियामाश्वास्य चाटुवाक्यानु

मे॰दू॰
टी॰
८

सारसक्रीडापदिष्टकूजितं दीर्घीकुर्वन्नविच्छिन्नान्निव गम्यते स्फुटितानां विकसितानां कमलानां आमोदेन परिमलेन सह मैत्र्या संसर्गेण
कषायः सुरभिः रागद्रवैकषायोस्त्रीनिर्यासे सौरभे रसशीतयादवः । अन्यत्र विमर्दगंधीत्यर्थः । विमर्दोत्थे परिमलो गंधे जनमनोहृ
रे आमोदः सोतिनिर्हारीत्यमरः । अंगानुकूलः मांद्यात्सुखस्पर्शः । अन्यत्र गाढालिंगने दत्तगात्रसंवाहन इत्यर्थः । भव भतिना चाटु
कोमृ । शिप्रायलपरिनंभेदत्तसंवाहनानीति संवाह्यते चरणौ ता ताः प्रियैः यतः कविरिवचद्यपति संभोगांते मम समुचितो ।
हस्त संवाहनामिति शिप्रा नाम काचित्तत्र त्यानदी तस्या वातः शिप्रावातः शिप्राग्रहणं शैत्यद्योतनार्थं प्रार्थना सुरतया
ग्लानि तत्र चाटूनि करोतीति तत्र थोकः पुनः सुरतार्थं प्रियवचः प्रियोक्तेत्यर्थः कमिव्यल प्रियतमो वल्लभ इव स्त्रीणां
सुरतग्लानि पूर्विरतखेदं हरति नुदति चाटूक्तिभिर्विस्मृतपूर्वखेदाः स्त्रियः प्रियचार्थनां सफलयंतीति भावः प्रार्थनाचा
न टुकारः खंडितानुमेयेनेति व्याख्याने शिप्रमाणे सुरतग्लानिहरणे न संभवति तस्याः पूर्वं सुरताऽभावात् पश्चात्तेन सुरत
ग्लानिहरणं तु तेदानीं तनेन कोपोपशमेन प्रार्थनाचाटुवचनसाध्यमित्युपेक्षितो चिताविवेकिनां ज्ञातेन्यासंगवि
कृते खंडितेर्ष्यायतेति कथापते दशरूपके इतः परं प्रक्षिप्तमपि श्लोकत्वेन व्याख्यायते । यस्यां विशालायां कोटिशो विपणि ८

कुपल्पवीथिकासुरचितान्स्थापितान् विपणिः पण्यवीथिकेत्यमरः इदं च विशेषणमायपालिंगं सर्वत्र सम्बध्यते तारान् शुद्धान्
तारो मुक्तादिसंशुद्धौ तरलेषु मौक्तिकेष्वित्यमरः तरलगुटिकान् मध्यमणीन् महारत्नानि तरलो हारमध्यग इत्यमरः
पिंडे मणौ महारत्ने गुटिका वटकापरे इति शब्दार्णवे हारान् मुक्तावलीस्तथा कोटिशो नंतशः शंखांश्च शुक्तयो मुक्ता
स्फोटाश्च शंखशुक्तीः मुक्तास्फोटः स्त्रियां शुक्तिः शंखस्यात्कंबुरस्त्रियामित्यमरः शष्पं बालतृणं तद्वच्छ्यामान् शष्पं बाल
सं तृणं घासो यवसं तृणमर्जुनमित्यमरः उन्मयूखप्ररोहान् उद्गतरश्म्यंकुरान् मरकतमणीन् गारुडरत्नानि तथा विद्रुमा
णां भंगान् प्रवालखंडांश्च दृष्ट्वा सलिलनिधयः समुद्रा तोयमात्रमवशेषो येषां ते तथोक्ताः सलक्ष्यन्ते तथानुमीयंत इत्यर्थः
रत्नाकरादप्यतिरिच्यते रत्नसंपद्भिरिति भावः अत्र प्रदेशे वत्सराजो वत्सदेशाधीश्वर उदयनः प्रद्योतस्य तन्नाम्नः उज्जयिनी
नायकस्य राज्ञः प्रियदुहितरं वासवदत्तां जह्रे जहार अत्र स्थले तस्यैव राज्ञः प्रद्योतस्यैव हैमं सौवर्णं तालद्रुमवनमभूत् अन ।
लगिरिर्नाम शक्रदत्तस्य दीयो गजो दर्पान्मदात् स्तंभमालानमुत्पाद्य उद्धृत्य उद्भ्रांतः उत्पत्य भ्रमणं कृतवान् इतीत्थंभूता

भिः कथाभिरित्यर्थः अभिज्ञः पूर्वोक्तकथाकोविदो जनः आगन्तून् देशान्तरादागतान् सितनिगमीत्यादिना कुणादिकस्तुन्प्रत्ययः।
बोधयन् यत्र विशालायां रमयति विनोदयति अत्र भाविकालंकारः ३८ तदुक्तं अतीतानागतं यत्र प्रत्यक्षत्वेन लक्ष्यते अत्यद्भुतार्थ
कथनाद्भाविकं तदुदाहृतमिति यत्र विशालायां वाहा हयाः यत्र शपामाः पलाशवर्णाः अत एव दिनकरहयस्पर्द्धिनः वर्णितो
वेगतश्च सूर्याश्वकल्पाः तथा शैलोदग्राः शैलवदुन्नताः करिणः प्रभेदान्मदस्राचाद्धेतोः त्वमिव वृष्टिमंतः अग्रं नयतीति
ग्रामण्यः सत्सूद्विषेत्यादिना क्विप् अग्रग्रामाभ्यां नयतेरिति वक्तव्य इति णत्वम् योधाग्रण्यो भटश्रेष्ठाः संयुगे युद्धे प्रतिदशानु
खमभि रावणं तस्थिवांसः स्थितवंतः अत एव चंद्रहासव्रणांकाः रावणासिहननचिह्नाः चंद्रहासो रावणखड्गः सा च सिमात्रेपि चक्र
चिदिति शाश्वतः प्रत्युतादिष्वामरणं [illegible] यः प्रतिबिंबमयः व्रणांकितयः शत्रुप्रहाराणां वीराणामाभरणमिति भावः अत्र स्वाभाविकोक्तिः।
कारः तदुक्तं ३५ जालोद्गीर्णैः गवाक्षमार्गनिर्गतैः जालं गवाक्ष आनाये जालके कपटे गणे इति यादवः केशसंस्कारधूपैः
केशसंस्कारस्य धूपैः वनिताकेशवासनार्थं गंधद्रव्यधूपैरित्यर्थः अत्र संस्कारधूपयोरपि तादर्थ्येपि यूपदार्वादिवत् प्रकृतिविका
रत्वाभावादश्वघासादिवत् षष्ठीसमासेन चतुर्थीसमासः उपचितवपुः परिपुष्टशरीरः बंधौ बन्धुरिति वा प्रीत्या भवनशिखिभिः १०

ग्रहं मयूरैर्दत्तो नृत्यमेवोपहारः उपायनं यस्मै तथोक्तः उपायनमुपग्राह्यमुपहारस्तथोपदेत्यमरः कुसुमैः सुरभिषु गंधिषु ललि
तवनिताः सुंदरस्त्रियः ललितं त्रिषु सुंदरे इति शब्दार्णवे तासां पादरागेण लाक्षारसेनांकितेषु चिह्नितेषु हर्म्येषु धनिक
भवनेषु अस्या उज्जयिन्या लक्ष्मीं पश्यन् अध्वनो ऽध्वगमनेन खेदं येथा अपनय ऽध्व भर्तुः स्वामिनो नीलकंठस्य भ
गवतः कंठस्येव छविर्यस्येति हेतोर्गणैः गणास्तु गणनायाः सा ऽऽ रतौ शैवः प्रमथे चयः इति शब्दार्णवे सादरं यथा तथावीक्ष्य
माणः सन् प्रियत्वस्तु सादरस्यादतिप्रियत्वे भवेदिति भावः त्रयाणां भुवनानां समाहारस्त्रिभुवनं तद्धितार्थेत्यादिना समासः
पात्रादिभ्यः प्रतिषेधो वक्तव्य इति वक्तव्यात् स्त्रीलिंगताप्रतिषेधे त्रिभुवनस्य गुरोस्त्रैलोक्यनाथस्य चंडीश्वरस्य कात्यायनी
वल्लभस्य पुण्यं पावनं धाम महाकालाख्यं तत्स्थानं यायाः गच्छ विध्यर्थे लोट् श्रेयस्करत्वात्सर्वथा गंतव्यमिति भावः उक्तं च
स्कांदे आकाशे तारकालिंगं पाताले हाटकेश्वरम् मर्त्यलोके महाकालं दृष्ट्वा काममितमाप्नुयादिति न केवलं मुक्ति
स्थानं किंतु विलासस्थानमपीत्याह धूतेति कुवलयरजोगंधिभिः कुवलयपरागगंधवद्भिः तोयक्रीडासु निरतानामासक्तानां

प

टी. १२

दः

युवतीनां स्नानीयं चूर्णादि करणे ल्युट् स्नानीयैर्मिश्रवेस्तानपि पादवः तेनतिक्तैः सुगंधिकटुतिक्तकषायपस्तु सौगंध्येपि प्रकीर्तिता
इतिहलायुधः सौगंध्यानिशायार्थविशेषणद्वये गंधवत्या नाम नद्यास्तत्र त्यायामहद्भिर्मारुतैर्धूतोद्यानं कंपितमाक्रीडमितिधा चो
विशेषणं ३७ हे जलधर महाकालं नाम पूर्वोक्तं चंडीश्वरस्थानमन्यस्मिन्संध्यातिरिक्तेपि काले आसाद्य प्राप्य तत्र स्थातव्यमत्व
यास्थेयमित्यर्थः हत्यानां कस्तुरिवेति घरो यावद्यावत्काले च भानुः सूर्यः नयनविषयं दृष्टिपथं अत्येत्यतिक्रामति अस्तमया
न्ते स्थातव्यमित्यर्थः यावदित्येतदवधारणार्थे यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे इत्यमरः किमर्थमत आह कुर्वन्निति श्लाघनी
यां प्रशस्यां शूलिनः शिवस्य संध्यायां यो बलिः पूजा तत्र पटहतां कुर्वन् संपादयन् आमंद्राणामीषद्गंभीराणां गर्जितानामविक
लमखंडं फलं लब्धासे लभेः कर्त्तरि लृट् महाकालनाथबलिपटहत्वेन विनियोक्ते गर्जित साफल्यं स्यादित्यर्थः ३८ तत्र संध्याकाले पा
दन्यासैर्नृत्यांगैः क्वणिता रशना मेखला यासां तास्तथोक्ताः क्वणितेन कर्मकर्त्ता क्तः तथा कर्मके त्यादिना कर्त्तरि क्तः लीलया विला
सेनावधूतैः कंपितैः रत्नानां कंकणमणीनां छायया कांत्या रचितारूपिता चलयश्चामरदंडा यैस्तैः वलिश्चामरदंडे च जराविश्ल
पचर्मणि चामरे वालव्यजने क्लांतहस्ताः तेन दैविकं नृत्तं चरितं तदुक्तं नृत्यसर्वस्वे स्वधूकंदुकवस्त्राणि दंडिकाचामरस्रजः ११

वीराणां घट्टत्वानुयत्कुण्डोन्नत्यंतद्देशिकं भवेदिति वेश्यपाः महाकालमुपेत्य नत्वं तत्त्यो गणिकास्त्वन्तो नखपदेषु नखदाने सुसु
खान्न सुखकरान्न सुखहेतौ सुखे सुखमिति शब्दार्णवे वर्षीस्याग्रविंदून् प्राप्य त्वयि मधुपश्रेणीदीर्घान् कटाक्षान् ॥ अ
पांगानामोत्सृते परे रूपकृताः संततः सद्यः प्रत्युप कुर्वीतीति भावः कामिनीदर्शनीयत्वलक्षणं शिवोपासनफलं लप्स्यसी
ति ध्वनिः ३८/१ पश्चात्संध्यावल्यनंतरं पशुपतेः शिवस्य नृत्यारंभे तांडवप्रारंभे प्रतिनवजपापुष्परक्तं प्रत्यग्रजपा
ना प्रसूनारुणं संध्यायां भवं सांध्यं तेजः दधानः उच्चैरुन्नतं भुजा एव तरवस्तेषां वनं मंडलं मंडलेन मंडलाकार
णाभिलीनोभिव्याप्तः सन् कर्त्तिरिक्तः भवान्याभवपन्त्या इंद्रवरुणभवशर्वेत्यादिना ङीप् आनुगागमश्च शांत उद्वेगो
गजाजिनदर्शनभयं यस्यास्तया अतएवस्तिमितेन निश्चलेन नयने यस्मिन्कर्मणि तत् तथोक्तं उद्वेगस्त्वरितेऽभ्ले षे भये कंपघ
गामिनीति शब्दार्णवे भक्तिः पूज्येष्वनुरागः भावेक्तिन् दृष्टं भक्तिर्यस्य सः दृष्टभक्तिः सन् पशुपतेरार्द्रं शोणितार्द्रं यन्नागा
जिनं गजचर्म अजिनं चर्म कृत्तिः स्त्रीत्यमरः तत्तेच्छां हरन्निवर्त्तय त्वमेव तत्स्थाने भवेत्यर्थः गजासुरमर्दनानंतरं
भगवानमहादेवस्तदीयमार्द्राजिनं भुजा[illegible]दण्डेन बिभ्रत्तांडवं चकारेति प्रसिद्धिः दृष्टभक्तिरिति कथं रूपसिद्धिः दृष्टप्र

मे॰दू॰ दस्यस्त्रियाः पुंवदित्यादिना पुंवद्भावस्य दुःप्रापत्वात् अप्रियादिष्विति निषेधात् भक्तिशब्दस्य प्रियादिषु पाठात् इति तदेतच्चोद्यं दृढ

१२ भक्तिरिति शब्दमाश्रित्य गणव्याख्याने प्रतिविहितं दृढभक्तिरस्येति नपुंसकपूर्वपदः आकाक्ष्यति वृत्तिमात्रपरत्वे दृढशब्दो गविशे

गु षस्यात्युपकारित्वात् स्त्रीत्वमविवक्षितमिति भावः भोजराजस्तु भक्तौ कर्मसाधनायामित्यनेन सूत्रेण भज्यते सेव्यते इति कर्मार्थे

त्वेन वामीभक्तिरित्यादि भवति भावसाधनायां तु स्थिरभक्तिर्भवान्यामित्यादि भवतीत्याह तदेतत्सर्वं सम्यग्विवेचितमस्माभीर

१२ म घुवंशसंजीविन्यां दृढभक्तिरिति ज्येष्ठ इत्यत्र तस्माद्दृढभक्तिरित्यत्रापि मतभेदेन पूर्वपदस्य स्त्रीत्वेन नपुंसकत्वेन च रूपसिद्धिर

स्तीति स्थितिः ४० इत्थं महाकालेश्वरस्य सेवाप्रकारमभिधाय पुनरपि नगरसंचारप्रकारमाह तत्रोज्जयिन्यां नक्तं रात्रौ रमणवसतिं प्रि

यभवनं प्रति गच्छन्तीनां योषितामभिसारिकाणामित्यर्थः सूचिभेद्यैरतिसान्द्रैरित्यर्थः तमोभिः रुद्धालोके निरुद्धदृष्टिप्रसारे न

रपतिपथे राजमार्गे कनकस्यनिकषोनिकष्यत इति कत्यानि कषोपलगतरेखावत्स्निग्धं तेजो यस्यास्तया स्निग्धं तु मसृणे

सान्द्रे रम्येऽक्लीबे तु तेजसीति शब्दार्णवे उदान्नाद्रिपाणएकादिक सौदामिनी विद्युत् तेनैकदिगित्यण् तया त्वमुर्वीं मार्गं दर्शय

किं च तोयोत्सर्गस्तनिताभ्यां वृष्टिगर्जिताभ्यां मुखरः शब्दायमानः मा स्म भूः कुतः स्त्रियो योषितो विक्लवा भीरवः ततो वृष्टिगर्जि

तेन कार्यमित्यर्थः नात्र तोयोत्सर्ग[illegible]ं सहितं स्तनितमिति विग्रहः विशि[illegible]ष्टस्यैव केवलस्तनितस्यानिष्टत्वात् न च द्वंद्वपदे
अल्पाच्तरं पूर्वमिति शास्त्रविरोधः लक्षणहेत्वोः क्रियाया इत्यत्र सूत्र एव विपरीतनिर्देशेन पूर्वनिपातशास्त्रस्यानित्य
त्वप्रतिपादनादिति ४१ । चिरं विलसनात् स्फुरणाच्च रविवन्नं विद्युद्देवकलत्रं यस्य स मघवान् सुप्ताः पारापताः कलरवाः यस्यां तस्यां वि
क्षपायामित्यर्थः पारापताः कलरवः कपोत इत्यमरः जातसंचारस्तत्रासंभावित एवेति भावः कस्यांचिद्भवनस्य वलभौ छादने उप
रिभाग इत्यर्थः आच्छादनं स्याद्वलभिर्गृहाणामिति यादवः तां रात्रिं नीत्वा सूर्य्ये उदिते सतीत्यर्थः पुनरध्वशेषं वाहयेद्ग
मयेत् तथाहि सुहृदां मित्राणां अभ्युपेता अंगीकृता अर्थस्य प्रयोजनस्य कृत्याः क्रिया येस्ते अभ्युपेतसुहृदर्था
इत्यर्थः सापेक्षत्वेपि गमकत्वात्समासः कृत्यात्क्रियादेव तयोः कार्ये स्त्री कुपिते त्रिष्विति यादवः कृत्यः श्चेति च का
रात्क्यप् न मंदायंते न मंदा भवंति खलु न विलंबंत इत्यर्थः लोहितादिडाज्भ्यः क्यषिति क्यष् वा क्यष इत्यात्मने ४२ त
स्मिन्काले पूर्वोक्ते सूर्योदयकाले प्रणयिभिः प्रियसमैः खंडितानां नायिकाविशेषाणां ज्ञाते न्यासंगति कृते खव

मे॰ टी॰ १२

ण्डिते ष्वीकथयितेति दशरूपके नयनसलिलं शांतिं तेनेतत्वं नयते द्विकर्मकः अतो हेतोर्भानोर्वर्त्माशु शीघ्रं त्यज तस्माद्ब
कोमाभूदिति भावः विपद्येऽनिष्टमाह सोपिभानुर्नलान्यंबुजान्यस्याः संतीति नलिनी पद्मिनी तस्यां बुजे नलनांतुराज्ञिना
केतुनस्त्रियामितिशब्दार्णवे तस्याः स्वकांतायाः कमलं स्वकुसुममेव वदनं तस्मात् प्रालेयं हिममेवास्रमश्रु हर्तुं शमयितुं प्र
त्यावृत्तः प्रत्यागतः नलिन्याश्च भर्तुर्भानोर्देशांतरे नलिन्यंतरगमनात् खंडितात्वमित्याशयः ततस्त्वयि करानरुन्
रुणद्धीति कररुत् क्विप् तस्मिन्कररुधि सति हस्तरोधिनि सतीति गम्यते बलिहस्तांशवः करा इत्यमरः अनल्पाभ्य
सूयोऽधिकविद्वेषः स्यात् प्रायेण छायाविघातात् क्रोधविशेषश्च कामिनामिति भावः ब्राह्मणं चार्कमीशानं विह्वं वा दे
विषो नरः श्रेयांसि तस्य नश्यंति रौरवं च भवेद्ध्रुवमिति निषेधात् कार्यहानिर्भविष्यतीति ध्वनिः ४३ गंभीरायाना
मस्सरितः उदारनायिका चेति ध्वन्यते प्रसन्नेऽनुरक्तत्वाद्दोषरहिते चेतसीव प्रसन्ने निर्मले पयसि प्रकृत्या स्वभा
वेन सुभगः सुंदरः सुंदरेऽधिकभाग्यांशे दुर्दिनेतरवासरे उदीर्यासौ श्रीमति च सुभग इतिशब्दार्णवे तेतव छायासेवा
त्मासोपि प्रतिबिंबशरीरं प्रवेशं लप्स्यते अपिशब्दात्तवेशमनि कौरपीति भावः तस्माच्छायाद्वारापि प्रवेशावश्यंभावित्वादस्मा १२

गंभीरायाः कुमुदवद्विशदानि धवलानि चटुलानि शीघ्राणि शफराणां मीनानामुद्वर्तितान्युत्फलनानि तान्येव प्रेक्षिता

नि अवलोकितानि वा चावच्चटुलं शीघ्रमिति विश्वः एतावदेव गंभीराया अनुरागलिंगं धैर्याद्दाक्ष्यान्मोघीकर्तुं

विफलीकर्तुं नार्हसि नानुरक्तां विप्रलब्धुमेतदर्थः धूर्तलक्षणं तु लिंगमिति निर्दयितामंकमप्राप्य सुंदरः अवेत्य रक्तां

यत्नेन रक्तां धूर्तो विमुंचति ४४ हे सखे प्राप्तवानीरशाखा वेतसशाखा येन तत्तथोक्तं अतएव किंचिदीषत्करधृतह

स्तावलंबितमिव स्थितं मुक्तस्त्यक्तो रोधस्तटमेव नितंबः पश्चिमे श्रोणिभागे द्विकटके कटाविति यादवः नीलंछेमवे

तीं तस्या गंभीरायाः सलिलमेव संतं नीलांवरधारणं विहरता यानि वारणानीति प्रसिद्धिः हृत्वाऽपनीय लंबमानस्य पीतस

लिलभारात्स्रंसमानस्य जघनारूढस्य चान्यत्वं तेन तव प्रस्थानं प्रयाणं कथमपि कृच्छ्रेण भावि कष्टत्वे हेतुमाह ज्ञातेति

ज्ञातास्वादोऽनुभूतरसः कः पुमान् विवृतं प्रकाशितं जघनं कटितटं पूर्वभागो वा यस्यास्तां जघने स्यात्कटौ पूर्वे श्रोणिभा

गापरां श्रवोरिति यादवः विहातुं त्यक्तुं समर्थः न कोपीत्यर्थः ४५ त्वन्निस्यंदेन तव वृष्ट्या उच्छ्वसिता या उपबृंहिता या वसुधा

या भूमेर्गंधसंपर्केण रम्यः सुरभिरित्यर्थः स्रोतःशब्देनेंद्रियं चापि नासिकाछिद्रो वा घ्राणं लक्ष्यते स्रोतांसि तु वेगेंद्रिययोरित्यमरः स्रोतः

रंध्रेषु नासाग्रजाहरेषु यद्वनितं शब्दस्तेन सुभगं यथा तथा दंतिभिर्गजैः पीयमानो वसुधागंधलोभादाघ्रायमाणः इत्यर्थः अने
नमाघ्रमुच्यते काननेषु वनेषु उदुंबराणां जंतुफलानां उदुंबरो जंतुफलो यज्ञांगो हेमदुग्धक इत्यमरः परिणमयिता परिपा
कयिताभितोऽस्त्वः शीतो वायुः देवपूर्वं देवशब्दपूर्वं गिरिमित्यर्थः उपजिगमिषो रुपगंतुमिच्छोः गमेः सनंतादुप्रत्ययः तेन
नीचैः शनैर्वास्यति त्वांपूजयिष्यतीत्यर्थः संबंधमात्रविवक्षायां षष्ठी देवपूर्वं गिरिमित्यत्र देवपूर्वत्वं गिरिशब्दस्य न तु संज्ञि
तत्तदर्थस्येति संज्ञायां संज्ञिनि गतत्वाभावात् अथवाच्यवचनं दोषमाहुर्लंकारिकाः तदुक्तमेकावल्यां यदवाच्यस्य वच
स्या नंसात्वाच्यवचनं ग्रथितमिति समाधानं तु देवशब्दविशेषितेन गिरिशब्देन शब्दपरेण मेघोपगमनयोग्यो गिरिर्लि
द्यते इति केचित् तत्पाद्यं ८६ तत्र देवगिरौ नियता वसतिर्यस्य तं नित्यसंनिहितमित्यर्थः पुराकिल तारकाख्यासुरविजयसंतु
ष्टः सुरप्रार्थनाच्च भगवान् भवानीनंदनः स्कंदो नित्यमहमिह शिवाभ्यां सह वसामीत्युक्तवान् तस्मात्तत्रैव वसतीति प्र
सिद्धो स्कंदं स्वामिनं पुष्पाणां मेघः पुष्पमेघः पुष्पमेघीकृतात्मा कामरूपत्वात्पुष्पवर्षकमेघीकृतविग्रहः सन् व्यो
मगंगाजलार्द्रैः पुष्पासारैः कुसुमधारापातैः धारासंपात आसार इत्यमरः भवान् स्वयमेव स्नपयतु अभिषिंचतु स्वयंपूजा

१६

याउत्तमत्वादितिभावः तथाचशंभुरस्यैद्दं स्ववंजतिचेद्देवमुत्तमासोदरात्मजैः मध्यमापाङ्गयेद्धत्येरधमायज्ञेनक्रि
यते स्कंदस्यपूजत्वसमर्थकमर्थांतरंन्यस्यतिरद्धेति तद्भगवान् स्कंदइत्यर्थः विधेयप्राधान्यान्नपुंसकत्वनिर्दे
शः वासववसेमावासवः तस्येदमित्यण् तासांवासवीनामैंद्रीणांचमूनांसेनानांसेवहेतुस्त्रस्यरक्षाहेतोःरक्षाकार
णेनरक्षामित्यर्थः वक्षीहेतुश्चयोगइति वक्षीनवांप्राप्तिः न्चतामगवताचंद्रशेखरेण वहंतीतिवहः पचाद्यच् हुतस्य
वहो वह्निस्तस्यमुखेसंभृतंसंचितं आदित्यमतिक्रांतमत्यादित्यं अत्यादयःक्रांताद्यर्थेद्वितीययेतिसमासः तेजोहिसा
क्षाद्भगवतोहरस्यैतन्मूर्त्यंतरमित्यर्थः अतःपूज्यइतिभावः मुखग्रहणंतु मुख्यत्वसूचनार्थं तदुक्तंशंभुरहस्ये गवांपश्चाद्वि
जसंत्रिहियोगिनांहत्क्षांवेदवचः परंसुचितरंविद्यान्मुखंत्वीवह्निवाजिनामिति ४७ ज्योतिषत्तेजसोलेखाराजयस्ता
संवलयमंडलस्यास्तीतिलेखावलयि गलितमयूरं ननुलोत्यात्स्वंपंक्तिक्रमित्याप्यवः मस्यमयूरस्य वर्हपिच्छेपिच्छवर्हे
नपुंसकेइत्यमरः भवानीगौरीपुत्रप्रेम्णा सुतस्नेहेन कुवलस्यदलेपत्रेतत्प्रापितद्योग्यं यथातथाकर्णेकरोतिदलेनसहधारयतीत्य
र्थः यद्वादलप्रापिदलभाजिदलाहेकर्णीकरोति कि.वंतात्सप्तमी दलंपदिहत्यसत्स्यानेवंविधत्वइत्यर्थः नाप्यन्तुकुवलयदलक्षेपीति
२१ पवति दोषोनिद्रापहरणंचेतिहरप्राक्तिरुपादरपिरर्धंदिकपाधोनापांगस्वतोपिश्रोतत्वादधवलितनेत्रांतं अपांगौनेत्रयोरंतावित्यमरः

१.टी. १५

पावकस्याग्नेरपत्यं पावकिः अत इञ् प्रत्ययः तस्य स्कंदस्य तद्देवीतं पश्चात्पुष्पाभिषेचनानंतरं देवगिरेः कर्तुः गृहलोन गुहासंक्र
मेन गुहाकुक्षिभिः प्रतिध्वानमहद्भिः गर्जितैर्नर्तयेथाः नर्तनं कारय मार्दंगिकभावेन भगवंतं कुमारमुपास्स्वेति भावः नर्तयेथा इत्यत्र
णावकर्मकाच्चित्तवत्कर्तृकादित्यात्मनेपदापवादः निगरणचलनार्थेभ्यश्चेति परस्मैपदं न भवति न पादम्याङ्यमाङ्यसपरिमुहरु
चिनृतवदवसइति निषेधात् ४८ एवं पूर्वोक्तप्रकारेण शरा बाणतृणानि शरो वाण तृणो वाण इति शाश्वतः तेषां वनं शर

15 वणं प्रति रतः शरेति त्वादिना णत्वं तत्र भवो जन्म यस्य तं शरवणभवं देवं स्कंदं शरजन्मा षडानन इत्यमरः अवर्जीव्य
घ्रि करणो बहुव्रीहिर्जन्माद्युत्तरपदं प्रति वामनः अगतिकत्वादाश्रयणीय इत्यर्थः आराध्योपास्य वीणाभिर्वीणावद्भिः व्रीर
ह्यादित्वादिनिः सिद्धद्वंद्वैः सिद्धमिथुनैः भगवंतं स्कंदमुपवीणयतु मागतैरित्यर्थः जलकणभयात् जलसेकस्य वीणाक्वणन
प्रतिबंधकत्वादिति भावः मुक्तमार्गस्त्यक्तमार्गः सन् लंघिताध्वा कियंतमध्वानं गत्वेत्यर्थः सुरभितनयालंभजां गवालंभेन संज्ञप
नेन जातां भुवि लोके स्रोतोमूर्त्या प्रवाहरूपेण परिणतां रूपविशेषमापन्नां रंतिदेवस्य दशपुरपतेर्महाराजस्य कीर्तिं चर्म
ण्वत्याख्यां नदीमित्यर्थः मानयिष्यन् सत्करिष्यन् व्यालंबेथाः व्यालंब्यावतरेरित्यर्थः पुरा किल राज्ञो रंतिदेवस्य गवालंभेष्वेकत्र सं
भृतात्सरक्तान्निस्यंदाच्चर्मराशेः काचिन्नदी सस्यंदे सा चर्मण्वतीत्युच्यते ४९ शार्ङ्गिणः कृष्णस्य वर्णो यस्य कांत्या तेन चोरेण तुल्यवर्णे

इत्यर्थः त्वयि जलमादातुमवनते सति पृथुमपि दूरभावाद्दूरत्वात्तनुं सूक्ष्मतया प्रतीयमाने तस्याः सिंधोः प्रवाहमेव त्याः प्रवाहं गग
नेगतिर्येषां ते गगनगतयः खेचराः सिद्धगंधर्वादयः एकमपि बहुव्रीहिः पूर्ववज्ज्ञात्मा उत्तरपदे द्रष्टव्यः नूनं सत्यं दृष्टीराव
र्ज्य आनमय्य एकमेकयष्टिकं स्थूलमहान्मध्यमणिभूतं इंद्रनीलो यस्य तं भुवो भूमेर्मुक्तागुणं मौक्तिकहारमिव प्रे
क्षिष्यंते अत्र नीलमेघस्य तस्य प्रवाहस्य च कंठगतमुक्तागुणत्वेनोत्प्रेक्षणादुत्प्रेक्षैवेयमिव शब्देन व्यज्यते निरुक्तकारस्
स्तु तत्र ततोपमायामिव शब्ददर्शनाद्दत्रोपमेवेति वन्नाम ५० हे घनं त्वमेव तामुत्तीर्य पक्ष्मोल्लता इव भ्रूलताः उपमित
समासः तासां विभ्रमा विलासाः परिचिताः अभ्यस्ताः भ्रूलताविभ्रमा येषु तेषां पक्ष्माणि नेत्रलोमानि पक्ष्म सूत्रादि सूक्ष्मांशे किंज
ल्के नेत्रलोमानीति शाश्वतः तेषामुत्क्षेपादुन्नमनाद्धेतोः कृष्णाश्च ताः शाराश्च कृष्णशाराः नीलशबलाः वर्णो वर्णेनेति समा
सः कृष्णरक्तासिताः शारा इति यादवः ततः शारशब्दादेव सिद्धे कार्ष्ण्ये पुनः कृष्णशब्दोपादानं कार्ष्ण्यप्राधान्यार्थं रक्तत्वं तु न विव
क्षितमुपमानानुसारात्तस्य स्वाभाविकस्य स्त्रीनेत्रेषु सामुद्रिकविरोधादितरस्याप्रसंगादिति क्वचित्तज्ज्ञावकथनं तदुपांतविषयं उ
पर्विलसंत्यः कृष्णशाराः प्रभा येषां तेषां कुंदानि माघ्यकुसुमानि माघ्यं कुंदमित्यमरः तेषां क्षेप इतस्ततश्चालनं तस्यानुगा अनुसा

रिणो ये मद्यकरास्तेषां प्रियं मुख्यं तानि तानि तथोक्तानि तेषां द्विप्यमाणकुंदानुधाविमद्यकरकल्याणामित्यर्थः दशपुरं रतिदेवनगरं त
त्रवधूः स्त्रियः वधूर्जाया स्नुषा स्त्री चेत्यमरः तासां नेत्रकौतूहलानां नेत्राभिलाषाणां सामिलाषहृष्टीनामित्यर्थः आत्मविंबं स्वमू(र्)
त्तिं पात्रीकुर्वन् व्रजपर अत्र मनुः सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरं तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षत इति अथानंतरं ब्रह्मावर्तो
नाम जनपदं देशं छायया अनातपमंडलेन गाहमानः प्रविशन् न तु स्वरूपेण पीठक्षेत्राश्रमादीनि परिहृत्य परिहृत्यान्यतो व्रजेदिति
वचनादिति क्षत्रप्रधनपिशुनं अद्यापि शिरःकपालादिमत्तया कुरुपांडवयुद्धस्य सूचकमित्यर्थः युध्यमायोधनं जन्यं प्रधनं प्रविदारण
मित्यमरः तत्प्रसिद्धं कुरूणामिदं कौरवं क्षेत्रं व्रजेथाः व्रजेत्यर्थः यत्र कुरुक्षेत्रे गांडीवधनुर्यस्य गांडीवधन्वार्जुनः वा संज्ञायामित्यनङा
देशः शितशरशतैर्निशितबाणसहस्रैः अस्यास्तीति गांडीवं धनुर्विशेषः गांड्यं जनात् संज्ञायामिति मत्वर्थीयो वप्रत्ययः कपिध्वजस्य गां
डीवं गांडिवौ पुन्नपुंसकावित्यमरः गांडीवं राजन्यानां राज्ञां मुखानि धारासारपातैः कमलानि त्वमिवाभ्यवर्षत् अभिमुखं दृष्टवान् शर
वर्षेण शिरांसि चिच्छेदेत्यर्थः परिहृत्येति बंधुप्रीत्या कुरुपांडवस्नेहेन न तु भयेन समरविमुखो यः कृतनिःस्पृहः लांगलमस्यास्तीति
लांगली हलधरः अभिमतां रसां भीष्टस्वादां तथा रेवत्याः ककुद्मिकन्यायाः स्वप्रियायाः लोचनमेवांकः प्रतिबिंबितत्वाच्चिह्नं यस्या(स्)
तां हालां सुरा हलिप्रिया हालेत्यमरः अभिप्रकृतं देशभाषापदमित्यत्र [illegible] हालेति देशभाषापदमप्यतीव कविप्रयोत्साधक

त्कृदाजहार वा मनः हृत्वा त्यक्त्वा दुस्त्यजामपीति भावः याः सरस्वतीरयः स्त्रियेवे हे सौम्य सुभग त्वं तासां सरस्वती
नां सरस्वत्याः इमाः सारस्वत्यस्तासां सारस्वतीनामपामभिगमसेवां कृत्वांतरं तरात्मनि शुद्धो निर्मलो निर्दोषो भविता
स्वल्पत्वाद्विवितत्वच्च अग्रे स द्वार एव परिवर्त्स्यतोसि भविष्यसीत्यर्थः वर्त्तमानसामीप्ये वर्त्तमानवद्वेति लृट् वलीमा ।
रेण वर्लीनेव कर्द्दमेन तु पापेनेत्यर्थः अंतःशुद्धिरेव संपाद्या न बाह्याविहितः शुद्धोपि सन् तव धर्मापचितार्थं सारस्व
त सलिलसेवी तत्र भवान् बलभद्रस्तु एवात्र निदर्शनं अतो भवांतापि भगवती सरस्वती सर्वथा सेवितव्येति भावः पर
तस्मादिति तस्मात्सरस्वतीप्रदेशात् कुरुक्षेत्रात् कनखलस्याद्रेः समीपे अनुकनखलं अनुयत्समयेत्यव्ययीभावः शैलरा
ज्ञाद्धिमवतोऽवतीर्णां सगरतनयानां स्वर्गसोपानपंक्तिं स्वर्गप्राप्तिसाधनभूतामित्यर्थः जह्नोर्नाम राज्ञः कन्यां जाह्न
वीं गच्छेर्गच्छ विध्यर्थे लिङ् या जाह्नवी गौर्याः वक्त्रे यासु कुटिरचना सापत्न्यरोषात् भ्रूभंगकरणं तां फेनैर्विहस्येव ह
सित्वे वा धावल्यात्फेनानां हासत्वेनोत्प्रेक्षा इंदोः शिरसोमालिक्यमत्तेलग्ना ऊर्मय एव हस्ता यस्याः सा इंदुलग्नोर्मिहस्ता सती शं
भोः केशग्रहणमकरोत् यथा काचित्प्रौढनायिका सपत्नी समाना मनादृत्य स्वयं वाल्लभ्यं प्रकटयंती भर्त्तारं सह शिरोरत्नेन
केशेष्वाकर्षति तद्वदिति भावः इदं च पुराकिलभगीरथप्रार्थनया भगवती गंगा ललितादापतंती गंगाधरो जटाजूटेन जग्राहेति

दू॰ टी॰ १७

शेषाकर्षिति करोतीति यामुपजीव्योक्तं ५४ तस्याइति सुरगजइव कश्चिद्दिग्गजइव व्योम्निस्थित्वा पूर्वार्द्धे जलोन्मुखइत्यर्थः के
चित्तु पूर्वार्द्धलंबीति पठंति अच्छस्फटिकविशदे निर्दोषस्फटिकावदाते अस्या गंगाया अं तत्तिर्यक् तिरश्चीनं यथा तथा ।
त्वं पातुं तर्कयेः विचारयेश्चेत् सपदि स्रोतसि प्रवाहे संसर्पंत्या संक्रामंत्या भवतश्छायया प्रतिबिंबेन असौ गंगा स्थाने प्रयागा
दन्यत्रोपगतः प्राप्तो यमुनासंगमो यया सा तथाभूते चाभिरामा स्यात् ५५ आसीनानामुपविष्टानां अस्या नाभिगंधानुपप ।
तेः मृगाणां कस्तूरिकामृगाणां नाभिसुगंधैः कस्तूरीसुगंधैस्तेषां तदुद्भवत्वात् अतएव मृगनाभिसंज्ञा च मृगनाभिर्मृगम
दः कस्तूरीत्यमरः अथवा नाभेयः कस्तूर्यः नाभिः प्रधाने कस्तूरीमदे पि क्वचिदीरितइति विश्वः तासां गंधैः सुरभिताः सुर
भीकृताः शिलायस्य तं तस्या गंगायाः अप्रभवत्यस्मादिति प्रभवः कारणं तं तुषारैः प्रालेयैः गौरं सितं अवदातः सितो गौर इ
त्यमरः अध्वश्रमं प्राप्याविनीयतेऽनेनेति विनयनं करणे ल्युट् अध्वश्रमस्य विनयनेऽपनोदके तस्य हिमाद्रेः शृंगे निषण्णः सन्
शुभ्रोपत्रिनयनस्य त्र्यंबकस्य वृषोक्ष वृषभः सुकृते वृषभे वृष इत्यमरः तेनोत्खातेनावदारितेन पंकेन सहोपमेयामुपमातु
मर्हां शोभां वक्ष्यसि वोढासि वहेर्लृट् विनयने त्यत्र पूर्वपदात्संज्ञायामग इति णत्वं न भवति कुम्भादिषु वेति निपातनात् तस्याः
प्रभवमित्यादिना हिमाद्रौ मेघस्य वैवाहिकगृहविहारो ध्वन्यते ५६ तस्मिन् हिमाद्रौ संरंभः संभ्रमे कोप इति शब्दार्णवे तेनोत्पतने
उत्प्लवने रभसो वेगो येषां ते तथोक्ताः रभसो वेगहर्षयोरिति विश्वः शरभाः अष्टापदा मृगविशेषाः शरभः शलभे चाष्टापदे प्रोक्तो । १७

17

म्लांतर इति विश्वः मुक्तौघाः सारंभोत्पतनमार्गे येन तं भवंतं सपदि स्वांगभंगायत्ते घयेयुः संभावनायां लिङ् भवंतोति दूरवर्त्तित्वा
त्स्वांगभंगातिरिक्तं फलं नास्ति तं घनस्येत्यर्थः तान् सारंभान् तुमुलाः संकुलाः करकाः वर्षोपलाः वर्षोपलस्तु करके त्यम
रः तासां वृष्टिः स्वस्याः पातेनावकीर्णान् विच्छिन्नान् कुर्वीथाः कुरुष्व विध्यर्थे लिङ् दृष्टोप्यधिक्षिपन् वि[illegible]पदः सद्यः
प्रविच्छेत स्वय इति भावः तथाहि आरंभं त इत्यादं आः के मीलिते पुयन्न उद्योगः निःफलः संयेषां ते तथोक्ताः विफलकर्मा
इत्यर्थः ते परिभवपदं तिरस्कारस्पदं के वा न भवंति भवंत्येवेत्यर्थः यदत्र घनोपलस्तु करकाइति यादववचनात्करकशब्दस्य
पुल्लिंगतामभिप्रायेण करकाणामावृष्टिरिति केषांचिद्व्याख्यानं तदन्येनानुमन्यते वर्षोपलस्तु करकाइत्यमरवचनव्याख्या
ने क्षीरस्वामिना कमंडलौ च करका इति नानार्थे पुंस्यपि वक्ष्यति अत उभयलिंगता प्रकाशिता यादवस्य पुल्लिंगताविधानेता
त्पर्यं न तु स्त्रीलिंगतानिषेधः इति न तद्विरोधः करकस्तु करके स्याद् दाडिमे च कमंडलौ पक्षिभेदे चास्ति करका च घनोपल इति
विश्ववचनेनोभयलिंगताव्यक्तेर्वैतिन कुत्रापि विरोधवार्ता अत एव रुद्रः वर्षोपलस्तु करका करकोपि च दृश्यत इति ५७॥
तं चेदिति वायौ वनवाते सरति वाति सरलानां देवदारुविशेषाणां स्कंधाः प्रदेशविशेषाः अस्त्री प्रकांडः स्कंधः स्यान्मूलाच्छाखाव।

धिस्फारो इत्यमरः तेषां संवर्द्धनेन संहर्षेण जन्म यस्य तथोक्तः जन्मोत्तरपदाधिकरणे बहुव्रीहिः साधारित्युक्तं उल्काभिः स्फुलिंगाभिः।
दीपितानि दग्धानि चमरीणां वालभाराः केशसमूहा येन सः दवः इत्यग्निर्दवे दावाग्निर्दवाग्निर्वनवह्निः वने च वचनवत्रौ च दवो दावश्च
वन इति शाश्वतः तं हिमाद्रिं बाधेत चेत्पीडयेद्यदि एवं दवाग्निं वारिधाराणां सहस्रैः शमयितुमर्हसि युक्तं चेदमित्याह उत्तमा[illegible]
18 सतां महतां समृद्धयः संपदः आपन्नानामापत्तिं गतानामार्तिशमनमापन्निवारणमेव फलं प्रयोजनं यासां तास्तथोक्ता दिति हि
माचलस्य दावानलस्त्वया शमयितव्य इति भावः ५८ तवेति तत्र हिमाद्रौ दृषदि कस्यांचिच्छिलायां व्यक्तं प्रकटं शश्वत्सदा सिद्धै
योगिभिः सिद्धो निष्पन्नः योगिनोरिति विश्वः उपचितबलि परिचितपूजं बलिः पूजोपहारे चेति विश्वः अर्द्धं मासोऽर्द्ध
इन्दुः अर्द्धेन्दुः खंडचन्द्रः अर्द्धं खंडे समेंशेऽर्द्धमिति विश्वः भित्तं सकलखंडे वा पुंस्यर्द्धोऽर्द्धं समेंशक इत्यमरः समौ लोपः सत।
स्यार्द्धेन्दुमौलेरीश्वरस्य चरणन्यासे पादविन्यासे भक्तिः पूज्येष्वनुरागः तया नम्रो भक्तिनम्रः सन् परीयाः प्रदक्षिणीकुरु
परिपूर्वादय[illegible]णि धातोर्लिङ् यस्मिन्पादन्यासे दृष्टे सति उद्धूतपापाः निरस्तसमस्तकल्मषाः सन्तः श्रद्दधाना विश्वसन्ताः पुरुषाः श्रद्धावि
श्वासः आस्तिक्यबुद्धिरिति यादवः श्रद्धं तरोरुपसर्गवद्वृत्तिर्वक्तव्येति करणस्य गात्रस्य विगमादूर्द्ध्वं देहत्यागादूर्द्ध्वमित्यर्थः करणं साधक
तमं क्षेत्रगात्रेन्द्रियेषु चेत्यमरः स्थिरं शाश्वतं यद्गणानां प्र[illegible]मथानां पदं स्थानं गणाः प्रमथसंख्यौघा इति वैजयन्ती तस्य प्राप्तये कल्पिष्यं

गा

ते प्राक्तंशब्दं तदित्यर्थः ह्रुते: पर्यासि वचनस्यालमर्थत्वात्तद्योगे नमः स्वस्तीत्यादिना चतुर्थी अलमिति पर्याप्त्यर्थग्रहणमिति भाष्यकारः त्र्यक्ष

कोव्यं त्र्यायामाशाशीवः श्रीचरणद्वयं हिमाद्रौ प्रामभवादीनां सिद्धये सन्नु कर्मणं दृष्ट्वा श्रीचरणं सम्यक् साधकः स्थिरत्वे तनुइच्छाधीनर

शरीरो हि विचरेच्चजगत्त्रयमिति शंभुरहस्ये ५६ शब्दायन्त इति हे मेघ अनिलैः पूर्यमाणाः ध्मायमानाः कीचका वेणुविशेषाः वेण

वः कीचकास्ते स्युर्ये स्वनंत्यनिलोद्धतमरः मधुरं श्रुतिसुखं यथा तथा शब्दायंते शब्दं कुर्वतीत्यर्थः शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे

इति क्यङ् प्रत्ययः अनेन वंशवाद्यसंपत्तिरुक्ता संशक्ताभिः भक्ताभिः वंशवाद्यानुषक्ताभिर्वा संरक्ताभिरिति पाठे संरक्तकंठीभिः किन्न

रीभिः त्रयाणां पुराणां समाहारस्त्रिपुरं तद्वि[illegible]तार्थेत्यादिना समाहारसमासः पात्रादित्वान्नपुंसकत्वं तस्य विजयो गीयते कंदरेषु दरीषु

दरीतु कंदरो वास्त्री त्यमरः तेतव चनिह्रादो मुरजे वाद्यभेदे ध्वनिरिव मुरजध्वनिरिव स्याच्चेत्तर्हि तत्र चरणसमीपे पशुपतेर्नित्यसंनिहि

तस्य शिवस्य नृत्यत इति शेषः संगीतनौ यंत्रिकं संगीते सम्यग्गीते नाट्यारंभप्रसिद्धके तूर्याणां त्रितये चेति शब्दार्णवे तदेवार्थः संगीते

वस्तु अर्थोभिधेयरैवस्तु प्रयोजननिवृत्तिष्वित्यमरः समग्रः संपूर्णो भावी ननु भविष्यति खलु भविष्यति गम्यादय इति भविष्यदर्थे णि

निः ५० प्रालेयेति प्रालेयाद्रेर्हिमाद्रेरुपतटं तटसमीपे अव्ययं विभक्तीत्यादिना समीपार्थेऽव्ययीभावः तांस्तान् वीप्सायां द्वि

रुक्तिः विशेषान् द्रष्टव्याथीन् विशेषोवयवे द्रव्ये द्रव्योत्तमवस्तुनीति शब्दार्णवे अतिक्रम्य दर्शं दर्शमीत्येत्यर्थः गच्छेत्यग्रत

न

नेनसंबंधः हंसानां द्वारं हंसद्वारं मानसप्रस्थायिनो हंसाः क्रौंचरंध्रेण संचरंतीत्यागमः भृगुपतेर्जामदग्न्यस्य यशसो वर्त्म यशः
प्रवृत्तिकारणमित्यर्थः यत्क्रौंचस्याद्रे रंध्रं क्रौंचरंध्रमस्ति तेन क्रौंचविलेन बलेर्दैत्यस्य नियमने बंधनेभ्युद्यतस्य प्रवृत्तस्यावि
विष्णोर्व्यापकस्य भगवतस्त्रिविक्रमस्य श्यामः कृष्णवर्णः पाद इव तिर्यगायामेनाद्रिप्रवेशनार्थं तिरश्चीनदैर्घ्येण शोभत इति ति
19 र्यगायामशोभीः सन् ताद्दशीत्येरिताभिः उदीचीं दिशमनुसरेरभिगच्छ पुराकिल भगवतो धूर्जटेः ... तद्रूपनिबद्धमधिकृत्यता
भृगुनंदने स्कंदस्पर्धया क्रौंचशिखरिणमतिनिशितविशिखमुखेन हेलया भ्रूत्पिंडभेदं भित्वा तत एव क्रौंचक्रोडादिव सद्यः समुद्धं
मितेकस्मिन्नपि दीरनिर्धौतनिखिलमपि जगदुज्ज्वलितमिति कथाश्रूयते ८१ गत्वेति क्रौंचविलनिर्गमनानंतरं ऊर्ध्वं च गत्वा दशमुख
स्यरावणसभुजैरुच्छ्वासिताः विश्लेषिताः प्रस्थानां सानूनां संधयो यस्य तस्य एतेन यन कौतुकसद्भाव उक्तः त्रिदशपरिमाणमेषामिति ।
त्रिदशाः संख्येय इत्यादिना बहुव्रीहिः बहुव्रीहौ संख्येये इत्यादिना समासांतो डच् दीरस्वामी त्रिदशानां वनितास्तासां दर्पणस्य स्फाटिकाति
त्वाद्राजतत्वाद्वा विवक्षाग्राहित्वेन दर्पणत्वं कैलासस्यातिथिः स्याः यः कैलासः कुमुदविशदैः शृंगाणामुच्छ्रायैरुन्नतिभिः खमा
काशं वितत्य व्याप्य प्रतिदिनं दिने दिने राशीभूतस्त्र्यंबकस्य त्रिलोचनस्याट्टहासः अतिशयितहास इव स्थितः अट्टहासविति शयदौमामि(
तियादवः धावल्याद्धासत्वेनोत्प्रेक्षणं हासादीनां धावल्यं कविसमयप्रसिद्धं ८२ उत्पश्येति स्निग्धं मसृणं भिन्नं मर्दितं यदंजनं
कज्जलं तस्य भे... भायस्य तस्मिन् त्वयि गते सा कुमुदमिव ... मदः कृतसद्दिरददशनस्य गजदंतस्य छेदवद्गौरस्य स्कंधन्यस्त

पाद्रेः कैलाससमे च केशपाशे कालस्यामलमेचकेत्यमरः वाससि वस्त्रे सन्ध्यात्ते सति हलभृतो बलभद्रस्य वस्त्रमिति ताभ्यां नयना
भ्यां प्रेक्षणीयां दर्शनीयां शोभां भवित्री भाविनी उत्प्रेक्षामि शोभामभविष्यतीति तर्कयामि इत्यर्थः पूर्णोपमालंकारः ६३
हि त्वेति तस्मिन् क्रीडाशैले कैलासे कैलासः कनकाद्रिश्च मंदरो गंधमादनः क्रीडार्थं निर्मिताः शंभोर्देवैः क्रीडाद्रयो भवन्ति
ति शंभुरहस्ये शंभुना शिवेन भुजगराजवलयं कंकणं हित्वा गौर्या भीरुत्वात् त्यक्त्वा दत्तहस्तावलंबा सती गौरी विहरेद्यदि वि
हरेच्चेत् तर्हि अग्रयायी पुरोगतः तथास्तंभितोऽपनीभावं प्रापितो तज्जीलत्सौघः प्रवाहो यस्य स तथाभूतः सन् भंगीणां पदवर्णांभक्त्या
रचनया भंगीभक्त्या विरचितवपुः कल्पितशरीरः सन् मणीनां तटं मणितटं तस्यारोहणाय सोपानत्वं सोपानभावं भजेत्यर्थः ६४ तत्रेति त
त्र कैलासे अवश्यं सर्वथा सुरयुवतयः वलयकुलिशानि कंकणकोटयः शतकोटिवाचिना कुलिशशब्देन कोटिमात्रं लक्ष्यते तेरुद्घा
तनानि प्रहारैस्तैरुज्जीर्णमुत्सृष्टं तोयं येन तत्त्वां यंत्रेषु धारायंत्रधारास्तासां गृहं तद्भावं यंत्रधारागृहत्वं नेष्यंति प्रापयिष्यंति हे सखे
घर्मेनिदाघे लब्धस्य घर्मलब्धस्त्वं चासदेवम्भूमिषु सर्वदा सर्वर्तु समाहारात प्रथमोदितमेघत्वाद्वा अत उक्तमाषाढस्य प्रथमदिवसे मेघं ददर्शे
ति तव ताभ्यः सुरयुवतीभ्यो मोक्षो न स्याद्यदि तदा क्रीडालोलाः क्रीडासक्ताः प्रमत्ता इत्यर्थः ताः सुरयुवतीः श्रवणपरुषैः कर्णकटुभिः
गर्जितैः कर्णभीषयेस्त्रासयेः अत्र हेतुः भयाभावात्तन्मोक्षो हि दुर्भयं इत्यनेनात्मनेपदं नापि भियो हेतुभये षुगित्यनेन षुगागमः ६५।

१ टी॰

१० हेमेति हे जलद हेमांभोजानां प्रसविजनकं जिगृहीत्यादिना इनिप्रत्ययः मानसस्य सरसः सलिलमाददानः पिबन्नित्यर्थः तथा ऐरा
वतस्य महेंद्रगजस्य कामचारित्वाद्व्याप्तिवशेवार्थीमिंद्रागमद्वारा वा समागतस्येति भावः द्वेले मानसजलादानकाले मुखपटेन यथा
प्रीतिस्तां कुर्वन् तथा कल्पद्रुमाणां किसलयानि पल्लवीकृतानि अंशुकानि सूक्ष्मवस्त्राणि अंशुकं वस्त्रमात्रे स्यात्परिधानोत्त
रीययोः सूक्ष्मवस्त्रे नातिदीप्ताविति शब्दार्णवे स्ववातैर्मेघवातैः धुन्वन् नानाबहुविधाश्चेष्टास्तोयपानादयो येषु तैः ललितैः क्री
20 डितैः नाभावभेदे स्त्रीनन्त्वेतललितं त्रिषु सुंदरे अस्त्रियां प्रमदारामे क्रीडिते जातपल्लवे इति शब्दार्णवे तं नगेंद्रं कैलासं कामाद्यथेष्टं
निर्विशोरुपभुंक्ष्व निर्वेशो भृतिभोगयोरित्यमरः यथेच्छाविहारो मित्रगृहेषु मैत्र्याः फलं मित्रं च ते कैलासः मेघपर्वतयोरश्रेषसंयोः
आर्द्रिचंद्रयोः शिखिजीमूतयोः अनिलानिलयोः हृष्टिरम्ययोर्मित्रता स्वयमिति दर्शनादिति भावः ६६ तस्येति प्रणयिनः प्रियतमस्येव
तस्य कैलासस्योत्संगे ऊर्ध्वभागे ऊरौ च उत्संगो मुक्तसंयोगे स कट्यन्यूर्द्धतलेपि चेति मालतीमालायां गंगादुकूलं श्लक्ष्णवस्त्रमिव गंगादु
कूलं उपमितसमासः दुकूलं सूक्ष्मवस्त्रे स्यादुत्तरायेऽसितांशुके इति शब्दार्णवे कामिन्यां तु गंगेव दुकूलं तत् स्रस्तं यस्यास्तां अलकां कुबेर
नगरी दृष्ट्वा कामिनीमिवेति शेषः हे कामचारिन् त्वं पुनस्त्वं तु न न ज्ञास्यते नावगमयिष्यसीति न किंतु ज्ञास्यस्येवेत्यर्थः कामचारि
णास्ते पूर्वमपि बहुत्वोदरसनसंभवादज्ञानमसंभावितमिति निश्चयार्थे दयप्रयोगः तदुक्तं स्मृति निश्चयसिद्धार्थेषु नञ्द्वयप्र

२०

क्र१

योग इति उच्चैर्विमाना उन्नतसप्तभूमिकभवना विमानोऽस्त्री देवयाने सप्तभूमौ सद्मनीति यादवः मेघवहनस्यानसूचनार्थमिदं विशे
षणं अन्यत्र विमाना विगतमाना निष्कोपा यस्यां अलकायां वो युष्माकं काले मेघकाले इत्यर्थः कालस्य सर्वसाधारणत्वादिति बहुवचनं सलिलमुद्गिर
न्तीति सलिलोद्गारं स्रवत्सलिलधारमित्यर्थः अभ्रंलिहं मेघस्पृहं कामिनीमुक्ताजालैर्मौक्तिकसरैः ग्रथितं प्रत्युप्तं मुक्तास्या
मौक्तिके मुक्ते इति यादवः अलकमिव चूर्णकुंतलमिव जातावेकवचनम् अलकाः चूर्णकुंतलाः इत्यमरः वहति बि
भर्त्ति अत्र कैलासस्यानुकूलनायकत्वं अलकायाश्च स्वाधीनपतिकानायिकात्वं धन्यते एकपत्नीकोऽनुकूलः इति प्रि
योपलालितानित्यं स्वाधीनपतिका पतेति लक्षणे उदाहरंति च लालयन्नलकव्रातान् रचयन्पत्रमंजरीः तांविनोदये
त्कांतश्छायावदनुवर्त्तत इति ६७ इति पूर्वमेघः समाप्तः विद्युत्वंतमिति पश्चादलकायां ललितारम्या वनिताः स्त्रियो येषु ते
सह चित्रैर्वर्त्तत इति सचित्राः सालेख्याः आलेख्याश्चर्ययोश्चित्रमित्यमरः तेन सहेति तुल्ययोग इति बहुव्रीहिः वोपसर्जनस्येति
सहस्य सभावः संगीताय तौर्यत्रिकार्थं प्रहतमुरजास्ताडितमृदंगाः मुरजस्तु मृदंगस्यादृक्का मुरजयोरपीति शब्दार्ण
वे मणिविकारा मणिमयास्तोया येषु ते अभ्रंलिहंतीत्यभ्रंलिहानि अभ्रंकषाणि वहाभ्रेलिह इति खशप्रत्ययः अरुर्द्विषदजंतस्य मुमि
ति मुमागमः अभ्रंलिहान्यग्राणि येषां ते तथोक्ताः अतितुंगा इत्यर्थः प्रासादा देवालयाः प्रासादो देवभूभुजामित्यमरः विद्यु

१०ह्री॰ २१

तोऽस्य संतीति विद्युत्वान् तं विद्युत्वंतं सेंद्रचापं इंद्रचापवंतं स्निग्धः श्यामो गंभीरो घोषो गर्जितध्वनिर्यस्य तं अंतर्गतं तोयं यस्य तमंतस्तो
यं तुंगमुन्नतं त्वां तैस्तैर्विशेषैर्ललितवनितत्वादिधर्मैः करणैस्तुलयितुं समीकर्तुं अलं शक्ता इत्यर्थः इति एवं तात् तुमुन्प्रत्ययः अ
लं पर्याप्ताः अलं भूषणपर्याप्तिशक्तिवारणवाचकमित्यमरः अत्रोपमानोपमेययोस्तन्मेघप्रासादधर्माणां विद्युद्वनितादीनां यथासंख्यम
न्योन्यासादृश्यान्मेघप्रासादसादृश्यप्रसिद्धिरितीदं बिंबभावेनेयं पूर्णोपमा ६८ संप्रति सर्वदा सर्वर्तुसंपत्तिमाह हस्त इति यत्रालकायां वधूनां

२१

स्त्रीणां हस्ते लीलार्थं कमलं लीलाकमलं शारत्किं गमेन तू भयत उक्तं शरत्पंकजलत्वाणेति अलके कुंतले जातावेकव चर्वनम् अ(
लकेष्वित्यर्थः बालकुंदैः प्रत्यग्रमाघ्यकुसुमैः अनुविद्धं अनुवेधो ग्रथनं नपुंसके नांचोक्तः यद्यपि कुंदानां शैशिरत्वमस्ति माघ्यं
कुंदमित्यभिधानात् तथापि हेमंते प्रादुर्भावः शिशिरे प्रौढत्वमिति व्यवस्थाभेदेन हेमंते कार्यमित्याशयेन बालविशेषणं अल
कमिति प्रथमापाठे सप्तमी प्रथमाभंगस्यात् नापस्तुतियत पुंल्लिंगताहानिरिति दोषांतरमाह तदसत् स्वभाववक्राण्यलकानि।
तासां तासां निर्लूनान्यलकान्यासां निर्लूनान्यलकानि पाटितमरः क्तत्वोऽधरः खंडितइत्यादिषु प्रयोगेषु नपुंसकलिंगताद
र्शनादिति आनने मुखे लोध्रप्रसवानां लोध्रपुष्पाणां शैशिराणां रजसा परागेण पांडुत्वाशेषः कर्णे चारुपेशलशिरीषं नैदाघकु
सुमविशेषः सीमंते मस्तके शवीथ्यां सीमंतमस्त्रियां मस्तकेशवीथ्यामुदाहृतमिति शब्दार्णवे तवोपगमस्त्वदुपगमो घनागमस्तत्पर्थः २१

तत्र पंकजत्वदुपगमजं वार्षिकमित्यर्थः नीपं कदंबकुसुमं सर्वत्रास्तीति शेषः अस्तिर्भवंतिपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्य
स्तीति न्यायात् इत्थं कमलकुंदादितत्कार्यसमाहाराभिधानार्थत्वात्सर्वर्तुसमाहारसिद्धिः कारणं विना कार्यस्यासिद्धिरिति भावः
३६ यत्रेति यत्रालकायां पादपा वृक्षा नित्यपुष्पाणि येषां ते नित्यपुष्पाः न तु ऋतुनियमादिति भावः अतएवोन्मत्तैर्भ्रमरैर्मुखराः शब्दा
यमानाः नलिन्यः पद्मिन्यः नित्यं पद्मानि यासां ता नित्यपद्माः न तु हेमंतादिवर्जमित्यर्थः अतएव श्रेणीभिः रचितरशनाः नित्यं हंस
परिवेष्टिता इत्यर्थः भवनशिखिनः क्रीडामयूरा नित्यं भास्वंतः कलापा बर्हाणि येषां ते तथोक्ताः न तु वर्षास्वेव अतएव केकाभिरु
त्कंठाः उद्ग्रीवाः प्रदोषा रात्रयः नित्यज्योत्स्ना चंद्रिका येषां ते तथोक्ताः न तु शुक्लपक्ष एव अतएव प्रतिहता तमसां वृत्तिर्व्याप्तिर्येषां ते तेन च
रम्याश्चेति तथोक्ताः ९० आनंदेति यत्रालकायां वित्तेशानां यक्षाणां वित्ताधिपः कुबेरस्यानुगमो धनिकयक्षयोरिति शब्दार्णवे आनंदो
त्थम् आनंदजन्यमेव नयनसलिलं अन्यैर्निमित्तैः शोकादिभिर्न इष्टसंयोगे न प्रियजनसमागमे न साध्यात् निवर्तिताया
न् न त्वप्रतिकार्यादित्यर्थः कुसुमशरजान्मदनोत्पन्नात् तापादन्यस्तापो नास्ति प्रणयकलहादन्यस्मान्मरणादिकारणाद्विप्रयो
गोपपत्तिर्विरहप्राप्तिर्नास्ति किंच यौवनादन्यद्वयो वार्द्धिकं नास्ति एतत् श्लोकद्वयं प्रक्षिप्तं ७१ यस्यामिति यस्यामलकायां यक्षा
उत्तमस्त्रीसहायाः ललितांगनासहचराः संतः सितमणिमयानि स्फटिकमयानि चंद्रकांतमयानि वा अतएव ज्योतिषां ताराणां छाया
याः प्रतिबिंबान्येव कुसुमानि तैरंचितानि परिष्कृतानि ज्योतिस्ताराग्निभाज्वालादिकं सूत्रार्थाधारा नाश्चितानि वैडूर्यं नीलरत्नं तेन पान

२२

मेर स्थानि शोभित्वमलक्ष्मे हर्म्यस्थलान्येत्य प्राप्य त्वं गंभीरो ध्वनिर्येषां तेषु पुष्करेषु वाद्यभांडमुखेषु पुष्करं करिहस्ताग्रे वाद्यभांड
मुखे जलेऽहत्यमरः ॥ सानकैर्मंदमंदं आहतेषु सत्सु एतच्च नृत्यगीतयोरप्युपलक्षणं कल्पवृक्षप्रसूतं कल्पवृक्षस्य कांतिताहा
चीप्रदत्वान्मधु अपि तत्प्रसूतं रतिः फलं यस्य तद्रतिफलं व कृत्रजातत्वाद्रतिफलाख्यं मधु मद्यं मा सेवं ते आहता पिबंतीत्यर्थः ताल
दीर्रसितान्मृतामलधीडोन्मत्तास्थ्यकालाकृयाधातिविद्रुमप्रीरस्पद्धकं देल्ली गुग्गूलसनैपतं ति डुं चेन्माधिकुव्य मंगुपचितं तच्च दे
हमूलान्मत्तकाप्येतस्मरदीपकं रतिफलाख्यं स्वादु सीतं मधइति मदिरार्णवे ७२ मंदाकिन्येति यत्रालकायां अमरैः प्रार्थिताः कांचिर
तासुदर्पइत्यर्थः कन्याय वा कुमार्यः कन्याकुमारिका नापीरितिविश्वः शिशिरैर्मंदाकिन्या गंगायाः पयसि मरुद्भिर्मारुतैः सेव्यमानाः
सन्त्यः तपानुतटं तटे करोहंतीति अनुतटरुहः क्विप् उपपदमतिङिति समासः तेषां मंदाराणां छायया तातपेनवारितोष्णाः
शमिततापाः सत्यः कनकसिकतासु मुष्टिभिर्निक्षेपगूढैः संवृतैः अथवा कनकसिकतानां मुष्टिषु निक्षेपेण गूढै रत्नैएकान्वेषव्ये म
ण्वेषणीयैर्मणिभिः रत्नैः संक्रीडंते गूढमणिसंज्ञयादेशिकक्रीडया सम्यक् क्रीडंतीत्यर्थः क्रीडोनुसंपरिभ्यश्चेत्यात्मनेपदं रत्नादिभिर्वालुकादौ गु
प्तद्रव्यचकमीभिः वालिकाभिः कृता क्रीडा नाम्ना गूढमणिः स्यात् तारासंक्रीडा गूढमणि गुप्तकेलिर्निलायनं पिंडुकंदुकेर डाह्येः स्यात्तादेशि
ककेलयइति शब्दार्णवे ७३ नीवीति यत्रालकायां अनिभृतकरेषु चपलहस्तेषु प्रियेषु नीवीवस्त्रग्रंथिः नीवीपरिमितो ग्रंथो स्त्रीणां जघ
नवाससीतिविश्वः नीवीति वंधः नीवीवंधः अतएव दावदपोनरु लंयं तस्मोच्छ्वसितेन त्रुटनेन शिथिलं क्षौमं दुकूलं रागादितिपत्त्रं आहरत्सु २२

मुक्तीमूढानां लज्जाविधुराणां बिंबं बिंबिकोफलं बिंब[illegible]फले बिंबिकायाः प्रतिबिंबे च मंडल इति विश्वः बिंबमिवाधरो यासां

तासां बिंबाधराणां स्त्रीविशेषाणां विशेषाः कामिनीनां नु भीरु बिंबाधरांगनाः इति शब्दार्णवे चूडामणिस्त्वकुमादे मुष्टिः अर्चिभिर्मी

मयूखैर्लिंगान् अर्चिर्ज्वालामयूखयोरिति विश्वः रत्नान्येव प्रदीपास्तान् अभिमुखं यथा तथा प्राप्यापि विफलप्रेरणो दीपनिर्वा

णात्तमत्वान्निःफलदेपो भवति अत्रांगनानां रत्नप्रदीपनिर्वाणप्रकृत्या मौग्ध्यं व्यज्यते ७८ नेत्रा इति हे मेघ नेत्रा प्रेरकेण सतत

तगतिना सदागतिना वायुना मातरिश्वा सदागतिरित्यमरः यद्विमानाग्रभूमीः यस्या अलकाया विमानानां सप्तभूमिकभव

नानामग्रभूमीः उपरिभूमिकाः नीताः प्रापिताः त्वामिव पश्यंति यान् नेत्वा हृशाभवा हस्रा इत्यर्थः त्वादृशः मेघसहस्रो नालोचने

कत्र चेति कत्रप्रत्ययः जलमुचो मेघाः आलेख्यानां चित्राणां चित्रं लिखितस्यापाद्यं स्यादालेख्यं तु यत्नतः निर्मितैः चोत्तमेचि

त्रुमिति शब्दार्णवे सलिलकणिकाभिः जलकणैः दोषस्फोटनमुत्पाद्य सद्यः शंकास्पृष्टा इव सापराधत्वाच्छंकयाविष्टा इव शंका

वितर्कभययोरिति शब्दार्णवे धूमोद्गारस्य धूमनिर्गमस्यानुकृतौ अनुकरणे निपुणाः कुशलाः जर्जरा विशीर्णाः संतः ज्ञा

तमार्गैर्गवाक्षरंध्रैः निःपतंति निःक्रामंति यथा केनचिदंतःपुरसंचारवशात् तेन गूढं स्त्यारहस्यभूमिं प्रापिताः नवस्त्रीणां

व्यभिचारदोषमुत्पाद्य सद्यः संशंकाः स्फुटं वेपानतरा जारा अंततः कुड्यमार्गैर्निःक्रामंति न हृदितिध्वनिः प्रकृतार्थः शंकास्पृष्टा

वि

इवेत्युत्प्रेक्षा ।१५ यत्रेति यत्रालकायां निशीथेऽर्द्धरात्रे अर्द्धरात्रनिशीथौ द्वावित्यमरः त्वत्संरोधस्य मेघावरणस्यापगमेनेन
विशदैर्निर्मलैश्चंद्रपादैः चंद्ररश्मिभिः पादा रश्म्यंघ्रितुर्यांशा इत्यमरः स्फुटजललवस्यंदिनः उल्वणं गानुकेलस्याविलः तंतु
जालावलंबा वितानलंबिसूत्रपुंजधराः तंतुगुंफिता इत्यर्थः चंद्रकांताश्चंद्रकांतमणयः प्रियतमानां भुजैरुच्छ्वासितानि
श्रांत्या जलसेकापवापलिथिलितानि आलिंगितानि यासां तासां स्त्रीणां सुरतजनितामंगग्लानिं अवयवानां ग्लानतां व्यालुं
पंति अपनुदंति ।१६ अक्षय्येति क्षेतुं शक्याः क्षय्याः क्षय्यजय्यौ शक्यार्थे इति निपातः ततो नञ्समासः भवनानां नानामंतरं त
र्भवनं अव्ययं विभक्तीत्यादिनाऽव्ययीभावः अंत्या अंतर्भवनमंतर्भवने वा निधयो येषां ते तथोक्ताः यथेष्टोपभोगसंभावना
र्थमिदं विशेषणं विबुधवनिताऽप्सरसः ता एव वारमुख्या वेश्या वेश्याः ताः सहाया येषां ते तथोक्ताः वारस्त्री गणिका वे
श्यारूपाजीवा पण्याजनैः सत्कृता वारमुख्यास्यादित्यमरः बद्धालापाः सम्भाविसंलापाः कामिनः कामुकाः अहन्यहनि प्रत्य
हं अव्ययं विभक्तीत्यादिनाऽव्ययीभावः अनुदिनमिति समासांतष्टच् अस्फुटरवोरेवेति टिलोपः रक्तो मधुरः कंठो ध्वनिर्येषां तैः र
क्तकंठैः धनपतियशः कुबेरकीर्तिमुच्चैर्गायद्भिर्देवगानस्य गांधारग्रामप्रायत्वात् उच्चैस्तरां गायद्भिरित्यर्थः किन्नरैः सार्द्धं सह
विभ्राजस्येदं वैभ्राजं तदित्याख्या यस्य तद्वैभ्राजाख्यं विभ्राजेन गंधर्वेंद्रेण ज्ञातं वैभ्राजमाख्या येति शंभुरहस्ये चैत्ररथ
स्य नामांतरमेतत् बहिरुपवनं बाह्योद्यानं निर्विशंत्यनुभवंति ॥१७

२२ दो २३

गत्येति यत्रालकायां कामिनीनामभिसारिकाणां निशि भवो नैशो मार्गः सवितुरुदये गत्या गमनेनोत्कंपः स्खलनं तस्माद्धेतोरलकेभ्यः पतितैः
मंदारपुष्पैः सुरतरुकुसुमैः तथा पत्राणां पत्रलतानां छेदैः खंडैः पतितैरिति शेषः कर्णेभ्यो विभ्रश्यंतीति कर्णविभ्रंशीनि तैः कनकस्य क
मलैः स्वर्णपद्मैश्चाविवक्षितार्थलाभे सति मयूराविग्रहेऽध्याहारदोषः एवमन्यत्राप्यनुसंधेयः तथा मुक्ताजालैर्मौक्तिकसरैः शिरोनिवि
शितैरिति शेषः तथा स्तनयोः परिसरः प्रदेशः तत्र विच्छिन्नानि सूत्राणि येषां तैः हारैश्च सूच्यते ज्ञाप्यते मार्गः पतितमंदारकुसुमादि
लिंगैरयमभिसारिकाणां पंथा इत्यनुमीयत इत्यर्थः १८ मत्वेति यत्रालकायां मन्मथो धनपतेः कुबेरस्य सखायं धनपतिसखः राजाहः
सखिभ्यष्टच् तदेवं महादेवं साक्षाद्वसंतं सखित्वस्नेहान्निजरूपेण वर्तमानं मत्वा ज्ञात्वा भयाज्ज्ञातेन लक्षणेन भयात् षट्पदा एव ज्या मौर्वी य
स्य तच्चापं प्रायः प्राचुर्येण न वहति न बिभर्ति तर्हि कथं तस्य कार्यसिद्धिरित्यत आह सभ्रूभंगेति तस्य मन्मथस्यारंभः कामिजनजयव्या
पारः सभ्रूभंगं प्रहितानि प्रयुक्तानि नयनानि दृष्टयो येषु तैः तथोक्तैः कामिन एव लक्ष्याणि तेष्वमोघैः सफलैरित्यर्थः चापं तु कदाचिन्मो
घमपि स्यादिति भावः चतुराश्च ता वनिताश्च तासां विभ्रमैः विलासैरेव सिद्धो निष्पन्नः यदर्थकारं याज्ञिककलं तत्प्रयोजनं निश्चितसान
प्रयोग इति भावः १९ चित्रमिति कुचधार्यं देहधार्यं २ परिधेयं ३ विलेपनं ४ चतुर्धा भूषणं प्राहुः स्त्रीणामन्यत्तु देशिकमिति रसाकरे तदेत
दाह यस्यामलकायां चित्रं नानावर्णं परिधेयं वसनं नयनयोर्विभ्रमस्यादेशः उपदेशे दक्षं विभ्रमोत्पादकमित्यर्थः मधु म

द्यं अनेन विभ्रमप्रधानो मंडनत्वं ज्ञेयं तत्र कुंडलादिवद्देहधार्येऽनभीवनीयं किसलयैः पल्लवैः उभयं चेत्यर्थः इदं तु कुचधार्यं
भूषणानां विकल्पान् विशेषान् देहधार्यमेतत् तथा चरणकमलयोर्न्यासस्य समर्पणस्य योग्यं रज्यतेऽनेनेति रागो रंजकद्रव्यं लाक्षे
ना.टी. वरागस्तं लाक्षारागं च इदं चांगरागादिविलेपनमंडनोपलक्षणमिति सकलं सर्वमिदं चतुर्विधमपीत्यर्थः अबलामंडनं प्रसाधनजातं(
२४ मेकः कल्पवृक्ष एव सूते जनयति न तु नानासाधनसंपादनप्रयास इत्यर्थः ८० इत्यमलकां वर्णयित्वा तत्रत्यस्वभवनं ताभिज्ञानमाह॥
तत्रागारमिति तत्रालकायां धनपतिगृहान् उत्तरेण कुबेरगृहेभ्य उत्तरस्मिन्देशे नवबन्यतरस्यामदूरेपंचम्या इत्यनेन एनप्र
२५ त्ययः एनया द्वितीयेति द्वितीया गृहाः पुंसि च भूम्न्येव इत्यमरः अस्माकमिदमस्मदीयं वृद्धाच्छ इति छप्रत्ययः अगारं गृहं सुर
पतिधनुश्चारुणा मणिमयत्वादभ्रंकष[illegible]त्वाच्च शक्रचापसुंदरेण तोरणेन दूराल्लक्ष्यं दृश्यं अनेनाभिज्ञानेन दूरत एवाज्ञा
तुं शक्यमित्यर्थः अभिज्ञानांतरमाह यस्यागारस्योपांते पार्श्वदेशे मम कांतया वर्द्धितः पोषितः कृतकतनयः कृत्रिमपुत्रः
पुत्रत्वेनाभिमान इत्यर्थः हस्तप्राप्यैर्हस्तावचेयैः स्तवकैः गुच्छैर्नमितः स्याद्गुच्छकः स्तवक इत्यमरः बालो मंदारवृक्षः कल्पवृक्षो
स्तीति शेषः ८१ इतः परं पंचभिः श्लोकैरभिज्ञानांतरमाह वापीति अस्मिन्नगारे मरकतशिलाभिर्बद्धः सोपानमार्गो यस्याः सा(
तथोक्ता विदूरे भवा वैडूर्यः विदूरान्न्य इति ञ्यप्रत्ययः वैडूर्याणां विकाराः वैडूर्याणि विकारार्थेऽण् स्निग्धानि वैडूर्याणि नाला
नि येषां तैर्हैमैः सौव[illegible]र्णैः विकचकमलैः वापी चास्तीति शेषः यस्यां वाप्यां सलिले कृतवसतयः कृतनिवासा हंसास्त्वां मेघं प्रेक्ष्य २४

प्रिया[illegible]यगतमुच्चैर्वर्षाकालेऽपि अकलुषत्वाद्गतदुःखाः संतः संतः सन्निकृष्टं सन्निहितं मुपगमे पीत्यर्थः मानसं यास्यंति नोत्कंठिष्यं
ति आध्यानमुत्कंठा स्मरणमिति कालिकायां ८२ तस्या इति वाप्यास्तीरे पेशलैः श्लक्ष्णैः चारौदक्षे च पेशल इत्यमरः इंद्रनीलै रचित
शिखर इत्यर्थः कनककदलीनां वेष्टनेन परिधिना प्रेक्षणीयो दर्शनीयः क्रीडाशैलोऽस्तीति शेषः हे सखे उपांतेषु स्फुरितास्त
डितो यस्य तं तथोक्तं इदं विशेषणं कनककदलीसामर्थ्यमुक्तं इंद्रनीलसामर्थ्यं तु मेघसत्वाभाव्यात् तामित्यनेन स्मर्यते त्वां
प्रेक्ष्य मद्गेहिन्याः प्रिय इति हेतोस्तस्य शैलस्य मद्गेहिनीप्रियत्वाद्धेतोरित्यर्थः कातरेण भीतेन चेतसा भयं चात्र सानंदमेव
वस्तूनामनुभूतानां तुल्यस्मरणदर्शनात् श्रवणात्कीर्त्तनाद्वापि सानंदाभीर्यया भवेदिति रसाकरदर्शनात् तमेव क्रीडाशैलमे
व स्मरामि एवकारो विषयांतरव्यवच्छेदार्थः सदृशवस्त्वनुभवादिद्वापि स्मृतिर्जायत इत्यर्थः अत एवात्र स्मरणाख्योलंकारः सदृशा
नुभवादन्यस्मृतिः स्मरणमुच्यत इति निरुक्तकारस्तु त्वां तमेव स्मरामि इति योजयित्वा मेघे शैलत्वारोप इति व्याचष्टे तदयुक्तं अना
र्जवादैंद्रियविकारोप्यसंपुरोवर्त्त्यनुभवात्मकत्वेन स्मरतिशब्दप्रयोगात् शैलत्वभावनास्मृतिरपि नोपपद्यते भावनायाः स्मृतित्वे प्रमा
णाभावात् अनुप्रयोगात्सादृश्योपन्यासवैयर्थ्याच्च विसदृशे शालिग्रामे हरिभावनादर्शनादिति ८३ रक्तेति अत्र क्रीडाशैले कुरवकाख्य
वृतिरावरणं यस्य तस्य कुरवकवृतेः मध्ये वसंते भवा माधव्यक्ता सा मंडपमस्यास्ति मुक्तलतागृहस्य अतिमुक्तः पुंड्रकः स्याद्वासंती माधवील

२०

तेत्यमरः प्रत्यासन्नौ सन्निकृष्टौ चलकिसलयश्चलपल्लवः अनेन पदन्यस्य पादताडनेषु प्रांजलित्वं व्यज्यते रक्ताशोकस्य स्मरोद्दीपकत्वादुक्तवि
शेषणं प्रसूनक्षुदशोकस्तु पुष्पेतो रक्तइति द्विधा बहुसिद्धिकरः पुष्पेतो रक्तोऽत्र स्मरवर्द्धनइत्यशोककल्पोदर्शनात् कांतः कमनीयः केशर
रो बकुलश्च अथ केशरे बकुलइत्यमरः स्यादिति शेषः एकस्तयोरन्यतरः प्राथमिकत्वादशोकइत्यर्थः मया सह तव सख्याः त्वत्प्रियायाइत्यर्थः
वामपादाभिलाषी दोहदछद्मनेत्यत्रापि संबंधनीयं स चाहं साभिलाषइत्यर्थः अन्यः केसरः दोहदं वृक्षादीनां प्रसवकारणं संस्कारद्रव्यं
25 तरुगुल्मलतादीनामकालेकुशलैः कृतं पुष्पाद्युत्पादकं द्रव्यं दोहदं स्यात्तु तत्क्रियेतिशब्दार्णवे तस्याछद्मना व्याजेन कपटोस्त्रीव्या
जदंभोपधयश्छद्मकैतवइत्यमरः तस्यास्तव सख्या वदनमदिरां गंडूषमद्यं कांक्षति मया सहेत्यत्रापि संबंधनीयं अशोकबकुलयोः स्त्रीपा
दताडनगंडूषमदिरे दोहदमिति प्रसिद्धिः स्त्रीणां स्पर्शात्प्रियंगुर्विकसति बकुलः शीधुगंडूषसेकात् पादाघातादशोकस्तिलककुरवकौ वीक्ष
णालिंगनाभ्यां मंदारो नर्मवाक्यात्पटुमृदुहसनाच्चंपको वक्त्रवाताच्चूतो गीतान्नमेरुर्विकसति च पुरो नर्त्तनात्कर्णिकारः ८४ तन्मध्ये चेति
किंचेतिचार्थः तन्मध्ये तयोर्वृक्षयोर्मध्येऽनतिप्रौढानां अनतिकठोराणां प्रकाशइव प्रकाशो येषां तैस्तरुणवेणुसच्छायैर्मणिभिर्मरक
तशिलाभिर्मूले बद्धा कृतवेदिकेत्यर्थः स्फटिकमयं फलकं यस्याः स्फाटिकफलका कांचनस्य विकारः कांचनी सा वासयष्टिरस्तीति
शेषः शिंजाभूषणध्वनिः भूषणानां तु शिंजितमित्यमरः शिञ्ज्धातुरयं मालव्यादिने तुदंत्यादिः योवेवशिडे इति दर्शनात् शिंजाप्रधानानिव
लयानि शिंजावलयानि तैः सुभगा रम्यास्तैस्तालैः करतलवादितैर्मम कांतया नर्तितो वो युष्माकं सुहृत्सखा नीलकंठो मयूरः मयूरो बर्हिणो बव २५

ह्री नीलकंठो भुजंगभुगित्यमरः दिवसविगमे सायाकाले यावद्विमध्यास्ते पस्यामास्ते इत्यर्थः अधिशीङ्स्थासां कर्मेति कर्मत्वाद्वितया।
तत्रागारमित्यादिश्लोकपंचकस्य श्लोकेषु अतिसमृद्धवस्तुवर्णनादुदात्तालंकारः तदुक्तं उदात्तं तु भवेद्यत्र समृद्धं वस्तु वर्णितं इति न चैषा
स्वभावोक्तिर्भाविकं वा तत्र यथास्थितवर्णनात् अत्र कविप्रतिभास्थापितसंभाव्यमानैश्वर्यशालि वस्तु वर्णनादारोपितविष
यत्वमिति नाप्यामस्य भेद इत्युक्तवंलंकारसर्वस्वकारः ८५ एभिरिति हे साधो निपुणः साधुः समर्थो निपुणो चेति कौशिकायां हृदयनिहितै
रभिलक्षणैरित्यर्थः एभिः पूर्वोक्तैर्लक्षणैस्तोरणादिभिरभिज्ञानैर्द्वारोपांते एकवचनमविवक्षितं द्वारपार्श्वयोरित्यर्थः लिखितौ वपु
र्भ्यां शंखपद्माकृतीययोस्तौ तथोक्तौ शंखपद्मौ नाम निधिविशेषौ निधिर्नाशेवधिर्भेदाः पद्मशंखादयो निधेः इत्यमरः दृष्टां च नूनं सांप्रतं
अधुनेदानीं अधुनेति निपातः मद्वियोगेन मत्प्रवासेन क्षामच्छायं उत्सवोपरमात् क्षीणकांति मद्गृहं भवनं लक्षयेथाः निश्चि
नुयाः तथाहि सूर्यापाये सूर्यापगमे सति कमलं पद्मं स्वामात्मीयामभिख्यां शोभां अभिख्या नाम शोभयोरित्यमरः ख्यातस्त्रोपसर्गाद्भ
त्यङ् प्रत्ययः न पुष्यति नोपचिनोति खलु सूर्यविरहितं पद्ममिव गृहपतिविरहितं गृहं न शोभत इत्यर्थः ८६ गत्वेति जगत्पहनिष्प्रयानंतरं
कृत्यमाह गत्वेति हे मेघ शीघ्रं संपात एव हेतुस्तस्य शीघ्रसंपातहेतोः शीघ्रप्रवेशार्थमित्यर्थः षष्ठी हेतुप्रयोगे इति षष्ठी संपातः पतने योगे प्र
वेशे वेध संविदो रितिविश्वः सद्यः सपदि कलभः करिशावकस्तस्य तनुरिव तनुर्यस्य तस्य भावस्तत्ता तां कलभतनुतां अल्पशरीरत्वं गत्वा

प्रथमकथिते तस्यास्तीरइत्यादिनापूर्वोद्दिष्टे रस्थानेनोनिबदनयोग्यइत्यर्थः क्रियाप्रोसेनिबसस्सन् अल्पाल्पप्रकाराः भाः प्रकाराः
सोभायस्यास्तामल्पाल्पभा सं प्रकारेण गुणवचनमस्येति द्विरुक्तिः स्वद्योतानामालिस्तस्याविलयितेन स्फुरितेन विद्युत्प्रकाशः सए
वदृष्टिस्तां भवनस्यांतरं तन्निवने तत्रपतितां प्रविष्टां कर्त्तुमर्हसि यथाकश्चित्किंचिदन्विष्यत्कोचिदुन्नतप्रदेशेस्थित्वाप्राननैः शनैः।
रतितरां द्राघीयसीं दृष्टिमिष्टदेशे पातयतितद्वदित्यर्थः ८१ संप्रति दृष्टिपातस्यफलं साभिज्ञानं श्लोकद्वयेनाह तन्वीत्यादि तन्वीकृ
शांगीतुप्रमीवरीशलक्षणं द्दं न्यूह्यशांतनुइत्यमरः वोतोगुणवचनादितिङीप् श्यामायुवतिः श्यामायौवनमध्यस्थेत्युत्पलमालायां शिखरा
एषेषां संतितेशिखरिणः कोटिमंतः शिखरं शैलवृक्षाग्रकक्षापुलककोटिषुइतिविश्वः शिखिरणोदशनायस्याः साशिखरिदशनाएतेनास्याः
आयुवत्वंपत्युराफ्यत्वं च सूच्यते तदुक्तं सामुद्रके स्निग्धाः समानरूपाः सुपंक्तयः शिखरिणः श्लिष्टाः दन्ताभवंतियासांतासांपादेजगत
सर्वं तांबूलरसरक्ताः स्युः स्फुटभासः समोदयः यस्याशिखरिणोन्तादीर्घजीवतितत्पतिरितिच पक्वेपदिएविंवकाफलं तद्विवाधरोयस्याः साप
क्वविंवाधरोष्ठी विंवाधरे तिशाकपार्थिवादित्वान्मध्यमपदलोपीसमासः नासिकोदरोष्ठेत्यादिनाङीप् मध्येक्षामा कृशोदरीत्यर्थः चकित
तहरिण्याः प्रेक्षणानीवहष्टयोयस्याः सात्रयोक्ताः एतेनास्याः पद्मिनीत्वं च्यते तदुक्तं रतिरहस्ये पद्मिनीलक्षणप्रस्तावे चकितमृग
दृ॰गाभेपांतरक्तेचनेत्रे इति निम्ननाभिर्गंभीरनाभिः अनेननारीणांनाभीगांभीर्यान्मदनरसातिरेकइतिकामसूत्रार्थः सूच्यते श्रो
२८
णीभारादलसगमनानतुजंघादोषात् स्तनाभ्यांस्तोकनम्राईषदवनता नतुवपुर्दोषात् युवतयएवविषयस्तस्मिन्कृवत्तिविषयेयुव
२६

तीरधिकृत्येत्यर्थः धातुर्ब्रह्मणः चाद्यसृष्टिः प्रथमशिल्पमिव स्थितेत्युत्प्रेक्षा प्रथमनिर्मितायुवतिरिवेत्यर्थः प्रायेण शिल्पिनां प्रथमनिर्माणे(
प्रयत्नातिशयवशात् शिल्पसौष्ठवं दृष्टमित्याद्यविशेषणं तथा चास्मिन् प्रपंचे न कुत्राप्येवंविधा रमणीति भावः तदेवंभूता या स्त्रीतन्नो(
तर्भवने स्यात्तत्र निवसेदित्यर्थः तामित्युत्तरश्लोकेन संबंधः ८८ तामिति परिमितकथां मितभाषिणीं सहचरे सहचारिणी अनेन वियोगासहि
ष्णुत्वं व्यज्यते मयि दूरीभूते दूरस्थिते सति चक्रवाकीं चक्रवाकवधूमिव जातेरस्त्रीविषयादयोपधादिति ङीप् एकामेकाकिनीं स्थितां तामंतर्भवन(
गतानां मे द्वितीयं जीवितं जानीयाः जीविततुल्यां मत्प्रेयसीमवगच्छेत्यर्थः तन्वीत्यादिभिरुक्तैर्लक्षणैरिति शेषः लक्षणानामन्यथाभावमाशंक्याह गाढेति
गाढोत्कंठां प्रविरलविरहवेदनां रागादलब्धविषये वेदनाया महीयसीं शोषयित्रीं तेषां गतां तामुत्कंठां विदुर्बुधा इत्यभिधानावलीनां गुरुषु विरहमु(
दुःसहेषु गच्छत्सु वर्तमानेषु दिवसेषु शिशिरेण शिशिरकालेन मथितां पीडितां पद्मिनीं वा पद्मिनीमिव इव व द्यायपा शब्दाद्
इति दंडी अन्यरूपां पूर्वरूपविपरीताकारां जातां मध्यान्येदिमेन पद्मिनी वान्यरूपां जातेति तर्कयामीत्यर्थः एतावता नेयमन्येति भ्रमितव्यमि
तिभावः ८९ नूनमिति प्रबलरुदितोच्छूनेस्यपुटितपुटे नेत्रे यस्य तत् उच्छूनेति श्वयतेः कर्तरि क्तः ओदितश्चेति निष्ठानत्वं वचिस्वपीत्यादि
ना संप्रसारणं संप्रसारणाच्चेति पररूपत्वे हलइति दीर्घः छ्वोः शूडनुनासिके चेति ऊठादेशे कृते रूपसिद्धिरिति वर्तमाना प्रक्रिया प्रामादिक
यारत्वादुपेदाणीयानं सति धातोरिकारस्य गत्वभावादिति मत्पंता ऊवादेशस्य वाकोविशेषइति एतेन विषादो व्यज्यते निश्वासानाम् शिशिरतयाऽतसं ता२
ता पोस्त्वेनभिन्नवर्णो विच्छायोऽधरोष्ठो यस्य तत् हतेन्यत्वं हसन्त्वत्वं एतेनाचिंता व्यज्यते लंबालकत्वासंस्काराभावेन लंबमानकुंतलाद

तत्त्वादसकलव्यक्तिः असंपूर्णाभिव्यक्तिः तस्याः प्रियाया मुखं त्वदनुसरेण त्वदुपरोधेन क्लिष्टं ते क्षीणकान्तेरिन्दोर्दैन्यं शोच्यतां विभर्ति नूनं
मिति तर्के नूनं तर्केऽर्थनिश्चय इत्यमरः पूर्ववत्तथापि न भ्रमितव्यमिति भावः ८० सर्वविरहिणीसाधारणान्युदाहरणानि संभावयति आलोके र
त्यादिभिस्त्रिभिः हे मेघ सा मत्प्रिया बलिषु नित्येषु प्रोषितागमनार्थेषु देवताराधनेषु व्याकुला पूजाव्यापृता वा विरहेण तनु कृशं भावगम्यं तत्कोतं
यीसादृश्यचरत्वात्तं प्रति संभावनयोत्प्रेक्ष्यमित्यर्थः मत्सादृश्यं मदाकारं मत्प्रतिकृतिमित्यर्थः पृथ्व्यपि सादृश्यं नाम प्रसिद्धं तत्र तस्य तरगतमा
27 कारसाम्यं तथापि प्रकृतित्वेन विवक्षितमिति इतरथालेख्यत्वासंभवात् अन्यथैकोऽपि आलेख्येऽपि च सादृश्यमित्यभिधानाच्च लिखन्ती कु
चित्फलकादौ विन्यस्यन्ती वा चित्रदर्शनस्य विरहिणां विनोदालयत्वादिति भावः ८ तच्च कामशास्त्रसंवादेन सम्यग्विशेषितमस्माभिर
घकंवशां संजीविन्यां सादृश्यप्रतिकृतिदर्शनैः प्रियायाः इत्यत्र मधुरवचनां मञ्जुभाषिणीं अतः पञ्जरस्थां हित्वा भ्यः कृते संरक्षणमित्यर्थः सा
रिकां स्त्रीपदादिविपूर्वे हे रसिके भर्तुः स्वामिनः स्मरसि क्वचित् स्मरसि किं कच्चिदिति कामप्रवेदने कच्चित्कामप्रवेदन इत्यमरः भर्तारं स्मर।
सि किमित्यर्थः अधीगर्थदयेशां कर्मणीति षष्ठी सा च शेषाधिकारात् शेषत्वविवक्षायां द्वितीयैव भवतीति वेदितव्यं स्मरणकारणमाह हि
यस्मात्त्वं तस्य भर्तुः प्रिया प्रीणातीति प्रिया इगुपधज्ञाप्रीकिरः क इति कप्रत्ययः अतः प्रेमास्पदत्वात्स्मर्तुमर्हसीत्यर्थः इत्येवं पृच्छन्ती वा वा
शाब्दो विकल्पे उपमानायां विकल्पे वेत्यमरः ते तवाल्लोके दृष्टिपथे पुराणि पतन्ति तद्योति पतिष्यन्तीत्यर्थः स्यात्प्रबन्धे पुरातीते निकटागामि
के पुरा इत्यमरः यावत्पुरानिपातयोर्लट् ८१ उत्संगे वेति हे सौम्य साधो मलिनवसने प्रोषिते मलिना कृशेति शास्त्रादित्यर्थः उत्संगे ऊरौ वी 29

यांनि दिप्य मम गोत्रं नाम अंकश्चिह्नं यस्मिंस्तत् मद्गोत्रांकं मन्नामांकितं यथा भवति तथा गोत्रं पुंनाम्नि चेत्यमरः विरचितानि पदा
नि यस्य तत्तथोक्तं गेयं गानार्थं प्रबंधं गीतमित्यपि पाठे स एवार्थः उद्गातुमुच्चैर्गातुं कामो यस्याः सा उद्गातुकामा तुं काममनसोरपीति म
लोपः देवयोनित्वाद्गांधारग्रामं गातुकामेत्यर्थः यदाह नारदः षड्जमध्यमनामानौ गायंति ग्रामौ नराः ऋषि न तु गांधारनामानं स लभ्यो देवयोनि
भिरिति तथा नयनसलिलैः प्रियतमस्मृतिजनितैरश्रुभिरार्द्राः तंत्रीः कथंचित्कष्टेन सारयित्वा आर्द्रत्वात्करेण मृज्य अन्यथा क्वणनासंभवादित्य
र्थः भूयो भूयः पुनः पुनः स्वयमात्मना कृतामपि विस्मरणेन हीमित्यर्थः मूर्छनां क्रमविशेषविशिष्टस्वरस्थापनां सागमेषु विलोपेनान्वादयंस्तु स्वयू
वीणाः स्वराणां स्थापनाः प्रोक्ता मूर्छनाः सप्त सप्त हीति संगीतरत्नाकरे विस्मरंती वा निपतन्तीति पूर्वेणान्वयः विस्मरणं चात्र दयितगुणस्मृतिज
नितमूर्छावशादेव तथोक्तं रत्नाकरे वियोगयोगयोरिष्टगुणानां कीर्तनास्मृतेः साक्षात्कामोऽथ वा मूर्छा दशधा जायते मदात् मत्सादृश्यमि
त्यादि नामनः संगानुवृत्तिसूचिता ८२ शेषानिति अथवा विरहस्य दिवसस्मात् स्थापितस्य तत आरभ्य निक्षिप्तस्यावधेरतस्य शेषान्तातश्रि
षान्मासान् देहलीदत्तपुष्पैः देहलीद्वारशाखा द्वारदारु गृहावग्रहणी देहलीत्यमरः तत्र दत्तानि राशित्वेन निहितानि पुष्पाणि यानि तैः गण
नया एको द्वावित्यादिसंख्यानेन भुवि भूतले विन्यस्यन्ती वा पुष्पविन्यासैर्मासान् गणयंतीत्यर्थः यद्वा हृदये निहितो मनसि कल्पितः आरंभ
उपक्रमो यस्तं अथवा हृदि निहिता आरंभाश्चुंबनालिंगनादयो व्यापारा यस्मिंस्तं संभोगं रतिमास्वादयंती अनुभवंती वा आलोकेनि
तीति पूर्वेण संबंधः ननु कथमयं निष्प्र इत्याशंक्य अर्थान्तरन्यासेन परिहरति प्रायेण भामा अंगनानां रमणविरहे हि प्रियविप्रयोगेषु एतेषु

वैका विनोदाः कालयापनोपायाः एतेन संकल्पावस्थोक्ता: तदुक्तं संकल्पो नाम विषयमनोरथ उदाहृत इति ८३ सव्यापारामिति हे सखे अहनि दि
वसे सव्यापारां पूर्वोक्तबलिचित्रलेखनादिव्यापारवतीं ते सखीं त्वत्प्रियां विप्रयोगो विरहः तेन प्रकारेण तथा प्रकारवचने थाल् न पीडयेद्व्यापारा
णां विनिद्रेष: किं तु रात्रौ निर्विनोदानि व्यापाराणि ते सखी गुरुतरा गुरुग्रयस्मात्तां गुरुतरशुचं अतिदुर्भरदुःखां शंके तर्कयामि शंका भयवित
र्कयोः इत्यमरः प्रव्यक्ताणीव अतो निशीथे ऽर्द्धरात्रे उन्निद्रां मुक्तनिद्रां अवनिशयनं भूशय्यां तां नियमार्थे स्थंडिलशायिनीं साध्वीं पतिव्रतां स
२४ ती साध्वी पतिव्रते त्यमरः अतो नान्यथा शंकितव्यमिति भावः त्वं तां त्वत्सखीं मत्संदेशैर्मद्वार्त्ताभिः लंघयितुं सुखयितुं सौधवातायनस्थः
सौधगवाक्षगतः सन् पश्य साध्वी धात्री चपितरौ मित्रदूतमुखादयः सुखयंतीह के पन मुख्योपायैर्वियोगिनीमिति रसाकरे दूत सदा
ये मेघ इति भावः अनेन जागरावस्थोक्ता ८४ पुनस्तामेव विशिनष्टि आधिक्षामामित्यादि चतुर्भिः आधिर्नाम मनोव्यथैव क्षामां
कृशां पुंस्याधिर्मानसी व्यथेत्यमरः दीयते: क्तौ रिक्तः क्षामो म इति निष्ठा तकारस्य मकारः विरहे शयनं विरहशयनं तस्मिन् विरहा
शयने पल्लवादिरचितशयने इत्यर्थः सन्निषण्णमेकपार्श्वं यस्यास्तामत एव प्राच्याः पूर्वस्या दिशो मूले उदयाद्रिप्रान्ते इत्यर्थः प्राचीग्रह
णं क्षीणावस्था द्योतनार्थं मूलग्रहणं दृश्यत्वार्थं कलामात्रं केलेव शेषो यस्यास्तां सुधांशोस्तनुं मूर्त्तिमिव स्थितां पुनः किंधा यारात्रिर्मे
यासां इच्छया कृतानि रतानि इच्छारतानि तैः प्राकपार्थिवादिषु द्रष्टव्यः क्षण इव नीता यापितः तां तज्ज्ञानो यामेव रात्रिं विरहेण महती
महत्वेन प्रतीप्रतीयमानां सती उष्णैरश्रुभिर्यापयंतीं यातेर्ण्यन्ताच्छतृप्रत्ययः आर्त्ति ह्रीत्यादिना पुगागमः स एव कालः खिन्नामल्पः प्रतीय २८

ते दुःखिनां तु विपरीत इति भावः एतेन कार्श्यावस्थोक्ता ८४ पादानिति जालमार्गप्रविष्टान् गवाक्षविवरागतान् अमृतशिशिरानिंदोः पादान् पूर्वप्रीत्या पूर्वस्नेहेन पूर्ववदानंदकरा भविष्यंतीत्याशयेनेत्यर्थः अभिमुखं यथा गतं तथैव संनिवृत्तं यथा गतं तथैव प्रतिनिवृत्तं तदा तेषामपि दुःसहत्वादिति भावः चक्षुर्दृष्टिं खेदात् सलिलगुरुभिरश्रुदुर्भरैः पक्ष्मभिश्छादयंतीमतएव स्थलेकमलिनीमिव स्थिताम् एतेन विषयद्वेषावस्था व्यक्ती सूचिता ८६ निश्वासेति कठिनस्पर्शं नूनं परुषं आगंडलंबं लम्बमिति समासः अलकं चूर्णकुंतलान् जातावेकवचनं अधरकिसलयं क्लेशयति क्लिश्नाति वमथोक्तेन उष्मणेत्यर्थः क्लिश्यते तद्विताद्युक्लिविकाणि निःश्वासेन विद्विषंती पुनः कीदृशी स्वप्नजोपि स्वप्नावस्थाजन्योपि साक्षात् संयोगासंभवादिति भावः मत्संभोगः कथं केन प्रकारेण स्यात् इति नैवोक्तार्थत्वादप्रयोगः प्रयोगे वा पौनरुक्त्यमित्यालंकारिकाः प्रार्थना पालि दुःनयन सलिलोपीडितेनावकाशं आक्रांत स्यान्नो दुर्लभामित्यर्थः निद्रामाकांक्षंती स्वप्नहेतुत्वादिति भावः अत्रास्रविसर्जनेनेलज्जान्या गोब्यसते ८८ आद्य इति आद्ये विरहदिवसे दाम शिरोमाल्यं हित्वा त्यक्त्वा पाचत्विरवा बद्धाग्रथिता शावसांते विगलितशुचा वीतशोकेन मयोद्वेष्टनीयां मोचनीयां स्पर्शक्लिष्टां स्पर्शसहति केशमूलेषु सव्यथामित्यर्थः कठिनाचसाविषमानिम्नोन्नता च तां कठिनविषमां एकवेणं जंकुजादिवदन्यत आद्यस्त्रिकुलकम्

स्य प्राधान्यविवक्षया विशेषणं विशेष्येण बहुलमिति समासः । एकवेणीमेकाम् न वेणीं पूर्वकालेत्यादिना तत्पुरुषः । तथाभूतां तां प्रोषितां अप

मिता अकर्त्तितो यान्ता नखा यस्य तेन करेण गण्डाभोगीव कपोलविस्तारात् असकृदनेकशः सारयन्तीं तां पश्येति पूर्वेण संबन्धः । अस

कृत्सारणाच्चित्तविभ्रमदशा सूचितेत्याहुः ॥ ८९ ॥ सेति । अबला दुर्बला । संन्यस्ताभरणं असकृदनेकशोकदुःखदुःखप्रकारेण प्रकारे गुणवचनस्ये

ति द्विर्भावः । शय्योत्सङ्गे निहितं पेशलं मृदुलं गात्रं शरीरं धारयन्तीं विहेती अनेनात्यन्ताशक्यामूर्छावस्था सूच्यते । सा त्वत्सखी त्वामपि नवजल

२७ मयं नवाम्बुरूपमस्रं वाष्पमवश्यं सर्वथा मोचयिष्यति द्विकर्मकत्वोपचारादीनां चोपसंख्यानमिष्यत इति मुचेः पचादित्वात् द्विकर्मकत्वं तथाहि प्रा

यः प्रायेणार्द्रान्तरात्मा मृदुलहृदयो मेघस्तत् दुर्वातः शरीरः सर्वः करुणा करुणामयी वृत्तिरन्तःकरणवृत्तिर्यस्य स करुणावृत्तिर्भवति तस्मिन्नव

स्मरे सर्वथा त्वयात्र शीघ्रं गन्तव्यम् अनन्तरदशापरिहारायेति सदभिप्रायः । ननु किमिदमादिमां चन्द्रकः प्रीतिमुपेक्ष्यावस्थान्तरालेप्येवमत्र भ

वान् कविराहृतवान् उच्यते संयोगो विप्रलम्भश्च द्विधा शृङ्गार इष्यते पूर्वानुरागमानाख्यप्रवासकरुणात्मना विप्रलम्भश्चतुर्धात्र प्रवास

स्तत्र त्रिविधा कथितः संभ्रमाच्छापात् कार्यतस्तु शापजः प्रागसंगतयोर्दृष्टेनो इति पूर्वानुरंजने चन्द्रकः प्रीत्याऽदशावस्था दशाध्यक्षं इति

ता पुनः इत्थं नः संगमसंकल्पा जागराः कृशताऽरतिः ह्रीत्यागोन्मादमूर्छान्ता इत्यनङ्गदशा दश पूर्वसंगतयोरेव प्रवास इति कारणात् वासाद

न इति तत्र पूर्ववच्चन्द्रः प्रीतिरुत्पत्तुमर्हति हि संगमस्तु इत्यप्यविच्छेदोऽत्र वर्ण्यते अन्यास्त्वपूर्ववद्वाच्या इति तावद्यावस्थिते वैपरीत्यादि मां हि

त्वावैरस्यादिति मां तथा हि संगमादीन् हित्वा चेष्टकाविरहावितिस्थितमत्ताहृदयोऽस्य तासां पादाः किं न्यूनतिवादिता प्रीतिरिति प्रोक्तानि रुचिरकृतानि तत् २६

चक्षुःप्रीतिर्भवेच्चित्रे दृष्टचरदर्शनात् यथा मालतिकारूपमग्निमित्रस्य पश्यतः प्रोषितानां तु भर्तॄणां कदृष्ट्या ऽदृष्टपूर्विता अथ तत्रापि संदे
हः स्वकलापिपृच्छतः किं वा भर्तुः प्रतिज्ञा स्यात्किं वा दैदिकभाषणात् प्रवासादागते तस्मिंस्त्यक्तं कलहे चेर्ष्या ९९ नन्वीदृशीं दशामापन्ने
ति त्वया कथं निश्चितमत आह जानेइति हे मेघ तव सख्या मनो मयि संभृतस्नेहं संचितानुरागं जाने अस्मात्स्नेहज्ञानकारणात् अहं प्र
थमविरहे प्रथमग्रहणं दुःखातिशयद्योतनार्थं तां त्वत्सखीमित्थंभूतां पूर्वोक्तावस्थापन्नां तर्कयामि ननु सुभगमानिनां कामिनां मेघ स्व
भावो यदात्मनि स्त्रीणां अनुरागप्रकटनं तत्राह वाचालमिति सुभगमात्मानं मन्यते इति सुभगमानः आत्ममाने खश्चेति खश्प्रत्ययः अरुर्द्विषदि
त्यादिना मुमागमः तस्य भावः सुभगंमन्यभावः सुंदरमानित्वं मां मां वाचालं बहुभाषिणं न करोति खलु सौंदर्याभिमानान्नः प्रलपामीत्यर्थः स्याज्जल्पा
कस्तु वाचालो वाचाटो बहुगर्ह्यवागित्यमरः आलाटजौ बहुभाषिणीत्यालच् प्रत्ययः किंतु भ्रातः यन्मयोक्तं तत्सकलं आधिक्षामामित्याद्युक्तं
तत्सर्वं ते ऽचिरात् शीघ्रमेव प्रत्यक्षं भविष्यतीति शेषः १०० रुद्धेति अलकैः रुद्धा अपांगयोः प्रसरो यस्य तत् तथोक्तम् अंजनेन स्नेहः स्नेग्धं तेन शून्य
मंजनस्नेहशून्यं अपि च किं च मधुनो मद्यस्य प्रत्यादेशात्प्रतिषेधात् विस्मृतो विलासो येन तत् तथोक्तं त्वय्यासन्ने सति स्वकुलवार्त्ता प्रंसिनीति प्रो
षः उपर्यूर्द्ध्वभागे स्पंदने स्फुरतीत्युपरिस्पंदि तथोक्तं निमित्तनिदाने स्पंदान्मूर्द्ध्नि [illegible] चलाभं भालेपदं [illegible] कवि इष्टप्राप्तिः दृशोरूर्ध्वमपांगे हातिम्
कुतीति मृगाक्ष्या नयनं वाममिति शेषः वामभागश्च नारीणां श्रेष्ठः पुंसां तु दक्षिणः दाने देवादिपूजायां स्पंदे तं कारणेपि चेति स्त्रीणां वामभागप्रश
[illegible]तमीनक्षोभान्मीनचलाच्चलस्य कुवलयस्य श्रिया [illegible] तर्कयामि तुल्यार्थैस्तुलोपमाभ्यां तृतीयान्यतरस्यामित्यत्र

दिशः प्रकीयस्यैव तुलाशब्दस्य प्रतिषेधादत्र च साहश्यं वाचित्वा नद्योगे पितृतीया १०१ वामस्वेति मदीयैः कररुहपदैः पुनर्भवः कररुहो नखोस्त्रीनखर(
मोस्त्रियामित्यमरः मुच्यमान्यः परिक्रियमाणः नखांकरहितहि मइत्यर्थः उरो नखपदस्यदत्वं तु रतिसुखैकं उरंशाकुचपार्श्वभुजोरः क्रोडिणमकिष्ट पुनरवा
सदमाहुरिति चिरपरिचितं चिरमभ्यस्तं मुक्ताजालं मौक्तिकसरमयं कटिभूषणं दैवगत्या दैववशेन त्याजितः संप्रति नखपदोद्भवाभावेन प्रीतोपचार(
रु ४ रूपस्यैवार्थ्यादितिभावः त्याजितेर्णिजंतात्कर्मणि क्तः द्विकर्मकरूपचादीनां चोपसंख्यानमिष्यत इति द्विकर्मकत्वं संभोगांते मम हस्तसंवाहनानि मर्दनो
नां संवाहनो मर्दनस्यादित्यमरः समुचितः परिचितः सरस इति यः परिपक्वो न भुक्तः स्निग्ध वि वदितः तत्रैव पांडिमस्तंभवात् स चासौ कदलीस्तंभश्च स इव गौरः(
करीरेस्मिन्नर्थे भूतले पीतेऽरुणोपि चेति मालतीमालायां अस्याः प्रियायावाम उरुस्थलत्वं स्पंदनं यास्यति प्राप्स्यति उरोः स्पंदाद्रतिविघ्नाद्दुर्वोः प्राप्तिः सुचा
३० रुसद्गतिनिमित्तनिदाने १०२ तस्मिन्निति हे जलद तस्मिन् काले त्वदुपसर्पणकाले सा मत्प्रियालब्धं निद्रासुखं यथा सास्याद्यदि भवेच्चेत् एनां निद्रागतांपि
यामन्वास्य पश्चादासित्वेत्यर्थः उपसर्गवशात्सकर्मकत्वं स्तनितविमुखो गर्जितनपराङ्मुखो निःशब्दः सन् अन्यथा निद्राभंगादितिभावः यामम
त्रं प्रहरमात्रं द्वौ यामप्रहरौ समावित्यमरः सहस्व प्रतीक्षस्व प्रार्थनायां लोट् शक्तोरेकवारस्करतस्या यामावधिकत्वात् स्वप्नेति तया भवितव्य(
मितिभावः तथा चरतिसर्वस्वे एकयामावधियौमौ स तस्य परमो मतः चंद्रशक्तिमतीयत्नो रुद्धरक्तमसमर्चितोरिति यामसहनस्य प्रयोजनमाह माभू
दिति अस्याः प्रियायाः कथमपि निद्रियतमेमयि कथंचित् कण्ठेण स्वप्नलब्धे सति गाढोपगूढं गाढालिंगनं नपुंसकेभावे क्तः सद्यः कंठाच्युतः स्रस्तोभु
जलतयोर्ग्रथितबंधो यस्मात्तत्पोक्तं माभूत् मास्तु कथंचिल्लब्धस्यालिंगनस्य सद्योवियोगो माभूदित्यर्थः न चात्र निद्रोक्तिः तामुन्निद्रामिति पूर्वोक्त
निद्राछेदेन विरुद्धत्वे सन्नमाद्य च स्याकृपाहिकनिद्रासंभवात् तथा रसकरे [illegible] ज्ञानर्थी वागमः स्वप्नमादिषु जायते दशमे दपु वासु चेति १०३

तामिति तां प्रियां स्वस्य जलकणिकाभिर्जलविंदुभिः शीतलेनानिलेनोत्थाप्य प्रबोध्य एतेन तस्याः प्रभुत्वाद्व्यजनानिलसमाधिर्व्यज्यते यथाह मो
जराज्ञः मृदुभिर्मर्दितैः पादैः शीतैर्व्यजनकैः शनैः गतेमिधारकैर्गीतैर्निद्रां बोधयेत्प्रभुमिति अभिनवैर्मालतीनां जालकैः समं जातिमुकुलैः सह सुमन
नामालती जातिः द्वारको जालकं क्लीबे कलिकाकोरकः पुमानित्यमरः साकं सत्रा समं सह इत्यमरः प्रत्याश्वस्तां शिशिरानिलं सपर्कात्पुनरुज्जीवितां स्व
नैः कर्चरितः आदितश्चेति चकारादिट प्रतिषेधः एतेनास्याः कुसुमसौकुमार्यं गम्यते त्वत्सनाथे त्वत्सहिते सनाथं प्रभुमित्याहुः सहितेपि ततापि नीतिश
व्याली वे गवाक्षे स्तिमितनयनां कोसाविति विस्मयात् निश्चललोचनां मानिनीं अनौचित्यात्सहितुमिति भावः विद्युद्गर्भः तः स्यापस्यतविद्युद्गर्भः त्वं त
लिविद्युद्गर्भः सन्निस्तयर्थः गर्भोपवरकेंतः स्थेग्नो कुक्षिस्थार्भकेमतइति शाश्वतः गवाक्षे दृष्टि प्रतिघाते न वक्रु मुखालोकन प्रतिबंधकत्वान्न विद्युत
विद्योतितत्वमितिभावः धीरोद्धत्वस्य सन् अनन्यथा स्वबलवादित्वे नानाशङ्कासप्रसंगादिति भावः स्तनितानात्मवचनानिते वक्तुं प्रक्रमेथाः
उपक्रमस्वविध्यर्थेलिङ् प्रोपाभ्यां समर्थाभ्यामित्यात्मनेपदं १०४ संप्रति दूतस्यात्मोत्कर्जनमभिमुखीकर्तुं चातुरीमुपदिशति भर्तुरिति विविधवा
तथेगतमर्तृकाननमवतीति अविधवा तत्संबोधने हे अविधवे सभर्तृके अनेन भर्तृजीवनसूचना दैस्वत्समीपमागते भर्तृसंदेशकथा नार्थर्म
तथेगतमर्तृकाननमवतीति अविधवा तत्संबोधने हे अविधवे सभर्तृके अनेन भर्तृजीवनसूचना दैस्वत्समीपमागते भर्तृसंदेशकथा नार्थर्म

३

पवनतनयं हनुमंतं मैथिली सीतेव सा मत्प्रिया उन्मुखी उत्कंठेनोत्सुकेन उच्छ्वसितहृदया विकसितचित्ता च सती त्वां वीक्ष्य तथा दृत्तेण संभाव्य सत्कृत्य अस्मा

२। त्सौम्येति मैत्रीज्ञापनात्परं सर्वं श्रोतव्यं अवहिता अप्रमत्ता च सती अप्रमत्ताच सती अत्र सीताहनुमत् उपसंख्यानादस्याः पातिव्रत्यं मेघस्य दूतगुणसंपत्तिश्च

व्यज्यते तद्गुणास्तु रसाकरे ब्रह्मचारी बली धीरो मायावी मानवर्जितः धीमानुदानो निःशंको वक्ता दूतः स्त्रियां भवेदिति ननु वार्तामात्रश्रवणादस्याः ।

कोलाभ इत्याशंक्याह पर्यन्त्यस्माति हे सौम्य साधो सीमंतिनीनां नारी सीमंतिनी वधूरित्यमरः सुहृदात्सुहृदन्मुखेनोपनतः प्राप्तः सुहृत्संदेशः विप्रलंभशंकानि

रास्यार्थं कांतस्योदंतो वार्ता कांतोदंतः वार्ता प्रवृत्तिर्वृत्तांत उदंतः स्यादित्यमरः संगमात्कांतसंपर्कात् किंचिदूनः ईषदूनः तद्वदेवानंदकारीत्यर्थः १०६ संप्रति

३। प्रदिशति तामिति हे आयुष्मान् प्रशंसायां । तु परोपकारश्लाघ्यजीवितादित्यर्थः मम वचनं प्रार्थनावचनं तस्मान्मनः स्वस्य उपकर्तुं च परोपकारेणात्मा

ने तेनार्थयितुमित्यर्थः उपकारक्रियां प्रति कर्मत्वे पितस्यानुकरोत्यादिवत्संबंधमात्रविवक्षायामात्मनइति षष्ठी च विरुध्यते यथाह भारविः सा

लक्ष्मीरुपकुरुते यया परेषामिति तथा श्रीहर्षश्च साधनामुपकर्तुं लक्ष्मीं द्रष्टुं विहायसा गंतुं न कुतः हेलं कस्य मनश्चारितं वा महात्मनाश्रोतुमिति

तथा च कश्चिन्नरद्वितीयादर्शनात्सर्वत्र तत्प्रेति नात्मव्याख्यानमध्यवचनमेवं तां प्रियामेवं ब्रूयाः किमिति हे अबले तव दुःखीएवंविधः सन् त्वां कुश

लं पृच्छतीति दुहाचीत्यादिना दुहिकर्मकत्वं तथाहि सुलभविपदां अयम्नेहि उविपत्तीनां प्राणिनामेतदेव कुशलमेव पूर्वाभाष्यमेतदेव

प्रथममवश्यं कर्तव्यं कृत्याचेत्यावश्यार्थे ण्यत् प्रत्ययः १०७ अंगेनेति किंच दूरवर्ती दूरस्थः न चागंतुं शक्यतइत्याह वैरिणा विरोधिना दैवे

न रुद्धमार्गः प्रतिबद्धवर्त्मा सते सहचरस्तेनुनाकृशेन गाढतप्तेनात्यंततप्तेनास्त्रेणाश्रुणा उत्कंठावेदेनास्यसंज्ञाता उत्कंठितेन तदस्य संज्ञातमि

त्यादिनाइतच् प्रत्ययः उत्कंठेनं कर्त्रा विरहिः संज्ञीतितेन महाधिकोच्छ्वासिना दीर्घीनिश्वासिनेत्यर्थः ताहीत्यकोष्णिनिः अंगेन ३१

स्वशरीरेण तनुकृशां तप्तसंतप्त मस्कृदुनमस्कान्ति त्वं आकरसाध्य पुलिंगे गौरादनेलस्तत्वकाप्रत्येत्यमरः अविरतोत्कंठं अविछिन्नं वेदनं उत्कोष्ठा

संतीव्रनिश्वासं तिग्मं तीव्रं स्वरंतीव्रां चंडमुष्णं स्पर्शं समुन्नमितिहलाकधः अंगत्वदीयं तैः स्वयं वेद्यैः संकल्पैर्मनोरथैर्विप्राप्ति एकामवती

त्यर्थः अत्र समानानुरागित्वज्ञानान्नोपके नापि कायाः स्वसमानावस्थ स्वसुन्नीयोक्तं १०८ संप्रति स्वावस्थानि वेदनाय प्रस्तौति शाकारव्येप

मिति हैअवले यत्तोप्रियः सखीनां पुरस्तादग्रे आननस्पर्शं त्वन्मुखसंपर्के लोभात् प्राप्तेनारवेणरख्येपं उच्चैर्वीच्यमपि यत् तद्वचनमयी

तिप्रोषः कर्णे कथयितुं लोलोभूत्किं लुलो लुपो लोनुभो लोलो लंपटो लालसोपि चेति यादवः श्रवणविषयं कर्णपथमतिक्रांतः तथा तो

चनाभ्यामदृष्टः अतिदूरस्थत्वात् द्रष्टुं श्रोतुं च न शक्यत इत्यर्थः सतेन प्रियस्त्वामुत्कंठया विरचितानि पदानि च यस्तत्तथोक्तं पदंश

व्येच वाक्ये चेति विश्वः इदं वक्ष्यमाणं श्यामा त्वं गमित्यादिकं मन्मुखेनाह मत्प्रवधानेन सखा वद ब्रूत इत्यर्थः १०९ साहृष्टप्रतिकृतिस्वप्नद

र्शन तदंगस्पृष्ट वस्तुस्पर्शनाख्यानि चत्वारि विरहिणां विनोदस्थानि तथा गुणपताकायां वियोगे वा प्रिय जनसदृशानुभवनं ततश्चि

त्रं कर्म स्वप्नसमये दर्शनमपि तदंगस्पृष्टानामुपनतवतां स्पर्शनमपि प्रतिकारो नेतें गव्यवस्थितमनसां कोपि गदित इति तत्र सदृशवस्तु दर्शनमाह।

श्यामास्विति श्यामा सुप्रियंगु लतासु श्यामा तु महिला ह्वया लता गोविंदिनी गुन्द्राप्रियंगुः फलिनी फलीत्यमरः अंगं शरीरमनुस्यश्यामि।

सौकुर्यादिसाम्यादंगमिति तर्कयामीत्यर्थः तथा चकितहरिणीनां प्रेक्षणे दृष्टिपाते प्राप्तानि चंद्रेव क्कछायां मुखकांति तथा शिखि

नां बर्हिणां बर्हभारेषु बर्हसमूहेषु केशान् प्रतनुषु स्वल्पासु नदीवीचिषु अत्र वीचिनां विशेषणोपादानेपि नाकृत्त गुणग्रह दोषः भ्रू

निर्वाहाय दोषनिवारणत्वात् तदुक्तं रसाकरे ध्वन्युत्पादे रसोत्कर्षे [illegible] रोा विशेषणादि दोषस्य नास्त्यपकृत्त गुणग्रहे

तुणो विशेषणं भ्रूविकाशात् पलाका इति पाठे भ्रुवः पताका इवेत्युपमित समासः उत्पश्यामीति सत्यं संबध्यते तथापि नास्ति मे मनो निर्वृति
रत्याशयेनाह हंत विषादे हंत खेदानुकंपायां वाक्यारंभविषादयोरित्यमरः हे चंडि कोपने चंडस्त्वत्यंतकोपन इत्यमरः गौरादित्वान्ङीप् ३
३१ मानकथनमात्रेण कोपितां त्वामिति भावः क्वचिदप्येकस्मिन्वस्तुनि तिष्ठतीति तत्र यो तं तेन तव सादृश्यं नास्ति अतो न निर्वृणोमीत्यर्थः एतेना
ति स्याः सौंदर्यमनुपममिति व्यज्यते ११० संप्रति प्रकृति दर्शनमाह त्वामिति हे प्रिये प्रणयेन प्रेमातिशयेन कुपितां त्वां कुपितावस्थायुक्तां त्वत्प्रतिकृति
मित्यर्थः धातुरागैर्गैरिकादयः धातुर्वातादि शब्दादि गैरिकादित्वगाधिति यादवः तत्र वरागारंजकद्रव्याणि चित्रादिरंजकद्रव्येलाक्षादौ प्रणयेच्छायाः
वरागादौ च रागः स्यादाक्षेपे रंजने पुमानिति शब्दार्णवे तैर्धातुरागैः शिलायां शिलापट्टे आलिख्य निर्माय आत्मानं मां मत्प्रतिकृतिमित्यर्थः
तेन तव चित्रायाः इत्यर्थः चरणपतितं कर्तुं तथालिखितुं यावदिच्छामि तावदेव इच्छासमकालमेव मुहुरुपचितैः प्रवृद्धैरस्त्रैरश्रुभिः कर्तृभिः अस्त्रम
श्रुणि शोणितं इति विश्वः मे दृष्टिरालुप्यते आव्रियत इत्यर्थः ततो दृष्टिप्रतिबंधाल्लेखनं प्रतिबध्यत इति भावः किंबहुना क्रूरो घातुकः नृशंसो घातु
कः क्रूर इत्यमरः कृतांतो दैवं कृतांतो यमसिद्धांत दैवाकुशलकर्मस्वित्यमरः तस्मिन्नपि चित्रेपि नौ आवयोः युष्मदस्मदोः षष्ठी चतुर्थी द्वितीया
स्थयोर्वानावाविति नावादेशः संगमं सहवासं न सहते आलेख्यसंगतिमप्यावयोरसहमानं दैवं साक्षात् संगतिं सहते इति किमु वक्तव्यमित्यपि
शब्दार्थः १११ अधुना स्वप्नदर्शनमाह मामिति सुप्तस्य विज्ञानं स्वप्नः स्वप्नः सुप्तस्य विज्ञानमिति कोषात् संदर्शनं संवित् दर्शनसमये
शास्त्रे दृष्टो स्वप्ने ज्ञानसंविदिति शब्दार्णवे स्वप्न इति संदर्शनानि स्वप्नज्ञानानि च्युतवदात्वादिवत्सामान्यविशेषभावे सह प्रयोगः तेषु म
याकथमपि महता यत्नेन लब्धाया गताद्दृष्टया इति यावत् तेन तव निर्दयाश्लेषे गाढालिंगनं स एव हेतुस्तस्य निर्दयाश्लेषायेत्यर्थः ब

ष्टीद्दे तु प्रयोगः इति षष्ठी ॥ आकाशेति निर्विषये प्रणिहितभुजं प्रसारितबाहुं मां पश्यंतीनां साक्षात्कुर्वतीनां वनस्थलीदेवतानां मुक्तास्थौ
क्तिकानीव स्थूला अश्रुलेशा वाष्पबिंदवः तरुकिसलयेषु अनेन चेलांचलेनाश्रुधारणसमाधि व्यज्यते बहुशो न पतंति खलु किं
तु पतंत्येवेत्यर्थः निश्चयेन न्नर्द्धय प्रयोगः तथाचालंकारसूत्रे स्मृतिनिश्चयार्थे ध्रार्द्धनन्त्रद्धयप्रयोग इति मदात्मगुरुदेवानां मत्कृपा
तः द्वितीयदिदेशः अंशो महद्दुःखमरणं च भवेद्भवमिति द्वितीयो देवताकृपातनिषेधदर्शनात् यद्वा स्वमरणाभावसूचनार्थं तरुकिस
लयेषु पतंतीत्युक्तं ११२ इदानींतदंगसंस्पर्शमाह भित्त्वेति देवदारुद्रुमाणां किसलयपुटान् पल्लवपुटान् सद्यो भित्त्वा तेषां दे
वदारुद्रुमाणां क्षीरस्रुतिभिः क्षीरनिस्यंदैः सुरभयः सुगंधयः इदे तुषाराद्रिवाताः खेलिंग्ये ये वाता दक्षिणमार्गेण तृतीयाविधाने प्रकृत्या
दिभ्य उपसंख्यानात् तृतीया समेन धावतीतिवत् तत्रापि पथः करणस्य प्रतीयमानत्वात् कर्तृकरणयोरित्येव तृतीयेति भाष्यकारः प्रव
त्ताश्चलिताः हे गुणवती सौशील्यसौकुमार्यादिगुणसंपन्ने तुषाराद्रिवाताः पूर्वं प्राक् एभिर्वीतैस्त्वदंगस्पर्शं भवेद्यदि किलेति संभा
वितवुद्धौ इत्यर्थः वार्त्तासंभाव्ययोः किलेत्यमरः मयालिंग्यंते आश्लिष्यंते अत्र वायूनां स्पर्शवत्त्वेप्यमूर्त्तत्वेनालिंगनायोगा
दालिंग्यंत इत्यभिधानं यद्यस्योन्मत्तप्रलाप इति वदति रुत्तकारः स्वप्नमेवोन्मत्तप्रलापापेक्षत्वात् एणीयः ११३ संक्षिप्येतेतिदी
...माः प्रहरा यस्याः सा दीर्घयामा विरहवेदनया तथा प्रतीयमानेत्यर्थः त्रियामा रात्रिः आद्यंतयोरर्द्धमात्रयोर्द्दिनव्यवहारात्

त्रियामेति वीरस्वामी दासएवं कथं केन प्रकारेण संक्षिप्येत लघूक्रियेत अहरपि सर्वावस्थासु सर्वकालेष्वित्यर्थः मंदं मंदं मंदप्र
कारः प्रकारगुणवचनस्येति द्विरुक्तिः कर्मधारयवद्भावात्सुपोलुक् मंदं मंदातपं अत्यल्पसंतापं कथं स्यात् तस्मादेव हे चटुल
नयने चंचलाक्षि इत्थमनेन प्रकारेण दुर्लभप्रार्थनं अलभ्यमनोरथं मे मम चेतो गाढतप्ताभिरतितीव्राभिस्त्वद्वियोगव्यथा
भिरशरणमनाथीकृतं ११४ नच मदीयदुर्दशाकर्णनेन भेतव्यमित्याह नन्विति एकवाक्यं तु शब्दो भेदकः किंतु न भेतव्यमित्यर्थः
अथवा नन्विति पाठः नन्वित्यामंत्रणे प्रश्नावधारणानुज्ञानुनयामंत्रणे नन्वित्यमरः ननु प्रिये अवलंबे धारयामि यथा कथं जीवामि
इत्यर्थः तत्तस्मात्कारणात् हे कल्याणि सुभगे तव वैशाभाग्येन जीवामीति भावः [illegible] त्वमपि नितरामत्यंतं कातरत्वं
भीरुत्वं मा गमः मा गच्छः गमेर्लुङ् माङ्योगादडागमाभावः तादृक् सुखितो राघवोऽपि ईदृशदुःखेनेकथं न बिभेमी साकांक्षयाह कस्ये
ति कस्यात्यंतं नियतं सुखमुपनतं प्राप्तं एकांततो नियमेन दुःखं वा उपनतं किंतु दशावस्था चक्रस्य रथांगस्य नेमिस्तद्वत् चक्रं
रथांगं तस्यांतो नेमिः स्त्री स्यात्प्रधिः पुमानित्यमरः तस्याः क्रमेण परिपाट्या क्रमः शक्तौ परिपाट्यामिति विश्वः नीचैरधः उपरि च गच्छति परि
वर्तते जंतोः सुखदुःखे तत्पाप्रवर्त्तेते इत्यर्थः ११५ नच निरवधिकमेतद्दुःखमित्याह शापांत इति शार्ङ्गं पाणौ यस्य तस्मिन् शार्ङ्गपाणौ
विष्णौ सप्तम्युपमानेति बहुव्रीहिः प्रहरणार्थेभ्यः परे निष्ठा सप्तम्यौ भवत इति वक्तव्यात् पाणिशब्दस्योत्तरनिपातः भुजंगःशे

षएव शयनं तस्मादुत्थिते सति मे शापांतः शापावसानं शेषांश्चतुरो मासान् मेघदर्शनदिनप्रभृति हरिप्रबोधदिनांतानित्यर्थः द
शादिनाधिक्यं तु न विवक्षितं इत्युक्तमेव लोचने मीलयित्वा चक्षुषी निमील्य मया तितिक्षा हयेत्यर्थः पश्चादनंतरं त्वं चाहं चावां
त्वदादीनि सर्वैर्नित्यमित्येकशेषः विरहेण गणितमेवं कं षत्र मीतिमनस्यार्त्तिनं तंतं वीक्ष्याथाह्निकत्रिः सर्वमित्यर्थः आत्मनो व२
रावयोरभिलाषं परिणता प्रौढा शरच्चंद्रिकायासां तासु क्षपासु निर्वेक्ष्यावः भोक्ष्यावहे निर्विवेशो भोगयोरित्यमरः अत्र केचिन्नभो
नभस्ययोरेव वार्षिकत्वात् कथमाषाढादिमासचतुष्टयस्य वार्षिकत्वमिति चोदयित्वा ऋतुत्रयपदाश्रयणादविरोध इति प
रिहृतं सर्वमसंगतं अत्र गतङ्गो यास्वचातुरो मासाइत्युक्ते कविनानुते वार्षिका इति तस्माद्यथम्रुक्तोपालंभ एव यच्चनाथे
नोक्तं कथमाषाढादिमासचतुष्टयात्परं शरत्काल इति तत्राप्याकार्त्तिकसमासेः शरत्कालानुवृत्तेः परिणतशरच्चंद्रिकास्वि
त्युक्तं ननु तदेव शरत्प्रादुर्भाव उक्त इत्यविरोध इति ११५ संप्रति तस्य मेघेवं चकत्वशंकानिरासायाति गूढमभिज्ञानमभिद
शति भूयश्चेति हेत्र बले भूयश्च पुनरप्याह त्वमन्तुरवे नेति शेषः मेघवचनमेतत् किमिति पुरा शब्दश्चिरातीते स्यात्पूर्वं घे चिराती
ते निकटागामिके पुरेत्यमरः पूर्वं शयने मे कंठलग्नापि त्वं गले वध्वस्य कथमन्यत्र गमनं संभवेदिति भावः निद्रां गत्वा किमपि केनवा
…ने नेत्यर्थः सस्वरं सशब्दं उच्चैरित्यर्थः रुदती सती विप्रबुद्धासीदिति शेषः अपासकृद्बहुशः पृष्टो मे हे कितव त्वं कामपि रम

३५

यन्मया स्वप्ने दृष्ट इति त्वया संतर्हि संसमंद हासं यथा तथा कथितं च इति भक्ताभूयश्चाह इति वा योजना ॥६८॥ तस्मात्पूर्वि [illegible]
ज्ञादभिज्ञायतेऽनेनेत्यभिज्ञानं लक्षणं तस्य दानात् प्रापणान्मां कुशलिनं क्षेमवंतं विदित्वा ज्ञात्वा हे असितनयने कुलेभवं कौ
लीनं तस्मात्कौलीनात् लोकप्रवादात् एतावता कालेन परासुनो चेन्नह्यागच्छेदिति लोकवादादित्यर्थः स्यात्कौलीनं लोकवादे युद्धे
च पशुपक्षिणामित्यमरः मयि विषये विश्वासिनी मरणशंकिनी मा भूः मा भव भवतेर्लुङ् माङ्योगाददागमप्रतिषेधः न च
दीर्घकालविप्रकर्षात्पूर्वस्नेहहानिश्चेति शंका का कार्येत्याह स्नेहानिति किमपि किंवा निमित्तं न विद्म इति शेषः स्नेहान् प्रीतिविर
हे सति अन्योन्यविप्रकर्षे सति विध्वंसिनो विनश्वरानाहुः तन्न ध्यानं भवतीत्यभिप्रायः किंतु ते स्नेहाः अभोगात् विरहे भोगाः
भावाद्धेतोः प्रसज्यप्रतिषेधेपि नञ्समास इष्यते इष्टे वस्तुनि विषये उपचितो रसः स्वादो येषु ते उपचितरसाः संतः प्रवृद्धत्व
द्भोगाद्दस्यर्थः रसो गंधे रसः स्वादे तिक्तादौ विषरागयोरिति विश्वः प्रेमराशीभवंति विप्रयोगासहिष्णुत्वदशामापाद्यंत इत्यर्थः स्ने
हप्रेमरागेरवस्याभेदाद्भेदः तदुक्तं आलोकनादि [illegible] रागस्ततो स्नेहो ततः प्रेमरतिः शृंगारे योगो वियोगो विप्रलंभ इति तदेव रसकुटी
कृतं रसाकरे प्रेक्षादिदक्षारम्भकुत्तचित्तत्वेमिलाषकः रागः [illegible] बुद्धिः [illegible] प्रवणान्मे [illegible] प्रेम [illegible]
हवर्ती नं शृंगारस्यालंबनं क्रीडासंयोगः सप्तधा क्रमश इति ॥६९॥ [illegible] लसं देशानयनेयाचते आश्वासि [illegible] यम ३८

विरहेणोद्गतशोकात्तीव्रदुःखं तेन संवीते एवं पूर्वं चारीत्याश्वास्योज्जीवनविनयनसाध्यं [illegible] उत्पादिताः

कूटाः शिखराणि यस्य तस्मात् कूटोस्त्री शिखरं शृंगमित्यमरः शैलात् कैलासात् [illegible] प्रत्यावृत्तः सन् साभिज्ञानं सलक्ष

णं यथा तथा शहितं प्रेषितं कुशलं क्षेमं येषु तैः तस्मात्तव [illegible] वचोभिः प्रातःकुंदप्रसवं प्रभातकुंदकुसुममिव शिथि

लं दुर्बलं मम जीवितं धारयेथाः स्थापयेः प्रार्थनायां लोट् ११८ संप्रति मेघस्य स्वप्रार्थनांगीकारप्रश्नपूर्वकं कल्पयति हे सौम्य साधो

35 इदं मे बंधुकार्यं देवदत्तकुलस्य गुरुकुलमितिवत् प्रयोगः त्वया व्यवसितं कच्चित् करिष्यामीति निश्चितं किं कच्चित्का

मप्रवेदने इत्यमरः अभिप्रायज्ञापने कामप्रवेदने न च तूष्णीभावादनंगीकारः शंक्यते स एवोचित इत्याह प्रत्यादे

शात् करिष्यामीति प्रतिवचनात् उक्तिस्तु भाषणं वा कथमादेशो वचनमिति शब्दार्णवे भवतो धारतां गांभीर्यं न कल्प

यामि न समर्थये खलु तर्हि कथमंगीकारज्ञानमित्याशंक्याह यतो याचितः सन् निःशब्दो निर्गर्जितोपि अप्रतिजा

नोपीत्यन्वयः चातकेभ्यो जलं प्रदिशसि ददासि युक्तं चैतदित्याह सतां सत्पुरुषाणां प्रणयिषु याचकेषु विषये ईप्सिता

र्थक्रियैव अपेक्षितार्थसंपादनमेव प्रत्युक्तं प्रतिवचनं हि क्रिया केवलमुत्तरमित्यर्थः नीचो वदति न कुरुते न वदति सुज

नः करोत्येवेति भावः ११८ संप्रति स्वापराधसमाधानपूर्वकं स्वकार्यस्यावश्यंकरणं प्रार्थयमानो मेघं विसृजति एतदिति हे

जलद सौहार्दात् सुहृद्भावाद्वा [illegible] विधुरो वियुक्त इति हेतोः विधुरं प्रत्यवायेस्यात्कं

ष्टविश्लेषयोरित्ति विभवः विधार[illegible]स्तु चिरं प्रज्वल्याभिप्रायादित्यर्थः मयि विषयेऽनुक्रोशबुद्ध्या करुणाबुद्ध्या वाऽस्मन्नत्तवानु
चित मननुरूपमपि प्रियमेतत् संदेशहरणं प्रार्थनात् कृत्वा प्रावृषा वर्षाभिः स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा इत्यम
रः संभृतश्रीरूपचितः शोभः सन् इष्टान् अभिलषितान् देशान् विचर देशेषु विचरेत्यर्थः देशकालाध्वगंतव्याः क
र्मसंज्ञा ह्यकर्मणामिति वचनात् कर्मकत्वे एवं मद्वत् क्षणमपि स्वल्पकालमपि ते तव विद्युता कलत्रेणेति शेषः विप्रयो
गो विरहो माभूत् मास्तु माङि लुङि त्याशीर्विलुङ् अंते काव्यसमाप्तित्वे कुर्यादाशि[illegible]मुतम् सर्वत्र व्याप्तये विज्ञाताय
केवानुरूपिणीति मिति सारस्वतालंकारे दर्शनात् काव्यांते नायकेच्छानुरूपोपमाशीर्वाद इत्यनुसंधेयं ।१२०। इति श्रीमहो
पाध्याय कोलचल मल्लिनाथ सूरि विरचितायां मेघदूतव्याख्यायां संजीवनसमाख्यायामुत्तरमेघः समाप्तः शुभमस्तु सर्वजग
तां।श्री० लिखितं माईदत्त संवत् १८९६ मिति चैत्र शुदि पूर्णिमा। श्रीरामः। तं संदेशं जलधरवरो दिव्यवाचा चचक्षे प्राणांस्तस्या जनहि
तकरो रक्षितुं यक्षवध्वाः प्राप्योदंतं प्रमुदितमनाः सापि तस्थौ स्वभर्तुः केषां न स्यादभिमतफला प्रार्थना ह्युत्तमेषु। श्रुत्वा वा
र्तां जलदकथितां तां धनेशोऽपि सद्यः शापस्यांतं सदयहृदयः संविधायास्तकोपः संयोज्यैतौ विगलितशुचौ दंपती हृष्टचित्तौ
भोगानिष्टानविरतसुखं भोजयामास शश्वत् ।२। मंगलं लेखकानां च पाठकानां च मंगलं मंगलं देवतानां च भुवो भूपतिमंगलं।